ISSN– 2320– 5911

# प्रज्ञालोकः

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य peer reviewed शोधपत्रिका)

## नवमः अङ्कः

उपदेष्टा

स्वामी आत्मप्रियानन्दः
स्वामी जपसिद्धानन्दः

सम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
वेलुडमठम्

प्रज्ञालोकः
(संस्कृतदर्शनविभागस्य वार्षिकी द्विभाषामयी विशेषज्ञसमीक्षिता शोधपत्रिका)
*Prajñāloka*
(Annual Bi-lingual **Peer-reviewd Research Journal** of the Department of Sanskrit & Philosophy)
ISSN– 2320–5911

**सम्पादकः -** डॉ. राकेशदाशः
**सम्पादकमण्डली -** डॉ. वेङ्कटरमणभट्टः, डॉ. गोपीकृष्णन् रघुः, डॉ. नागराजभट्टः, डॉ. नीरजकुमारभार्गवः, स्वामी वेदार्थानन्दः, डॉ. शन्तनुः अयाचितः, डॉ. सुखदेवभट्टः

**Editor :** Dr. Rakesh Das
**Board of Editors :** Dr. Venkataramana Bhat, Dr. Gopikrishnan Reghu, Dr. Nagaraja Bhat, Dr. Neeraj Kumar Bhargave, Swami Vedarthananda, Dr. Shantanu Ayachita, Dr. Sukhdev Bhat

**प्रकाशकः -** कुलसचिवः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
वेलुडमठस्थस्य, हावडामण्डले, पश्चिमवङ्गेषु, भारतवर्षे

**Publisher :** Registrar
Ramakrishna Mission Vivekananda Educational and Research Institute (RKMVERI)
Belur Math, Howrah, West Bengal, India
E-mail : prajnaloka.rkmvu@gmail.com

©प्रकाशकस्य
©Publisher

प्रकाशनवर्षम्– २०२१
Year of Publishing– 2021

मूल्यम्– ₹ ७०/–
Price– ₹ 70/-

Powered by LaTeX 2ε

Printer : Rama Art Press, 6/30, Dum Dum Road, Kolkata 30

# सूचीपत्रम्


| क्रमः | निबन्धः निबन्धकारश्च | पुटम् |
|---|---|---|
| १. | निवेदनम् | i |
| २. | Foreword<br>Swami Atmapriyananda | iii |
| ३. | ईशावास्योपनिषत्प्रमेयनिरूपणे<br>तात्पर्यलिङ्गाश्रयत्वविमर्शः<br>चन्दनमुखार्जी | 1 |
| ४. | श्रीरामकृष्णविवेकानन्दीयः<br>सम्प्रदायसमन्वयसिद्धान्तः<br>स्वामी वेदार्थानन्दः | 15 |
| ५. | देवताप्रत्ययार्थविचारः<br>डा. गोपीकृष्णन् रघुः | 19 |
| ६. | अर्थवत्सूत्रे प्रत्ययान्तपर्युदासविमर्शः<br>राजकुमारमण्डलः | 23 |
| ७. | रघुवंशमहाकाव्यस्य तृतीयचतुर्थसर्गयोः<br>मत्वर्थविमर्शः<br>शान्तनुनायेकः | 34 |
| ८. | आधुनिकेऽस्मिन् कालखण्डे<br>संस्कृतानूदितसाहित्यस्य योगदानम्<br>मौमितावरः | 42 |
| 9. | In Search of *Bhūmā*<br>Banani Barman | 67 |
| 10. | The status of Kinnaras in Ancient India and Modern India and also mostly based on Sanskrit Literature<br>Nilachal Mishra | 74 |

# निवेदनम्

प्रज्ञालोकाख्याया विबुधमुदातानिकायाः पत्रिकाया इयं नवमी सञ्चिका। पूर्ववत् लेखानां चयने विशेषज्ञानां मतम् एव अङ्गीकृतम्। प्राबन्धिकानां परिचयम् अज्ञातवन्तः समीक्षकाः प्रबन्धानां समीक्षाम् अकुर्वन्। तेषां समीक्षकाणां कृते कार्तज्ञ्यं प्रकटयामः।

अस्मिन् अङ्के वेदान्त-स्मृति-व्याकरण-साहित्य-शास्त्राणि अधिकृत्य प्रबन्धा प्राकाश्यम् अयन्। मुखोपाध्यायोपाह्वः चन्दनः ईशोपनिषदः अद्वैतपरता सम्यग् व्याख्याता अधिकरणमुखेन। वेदार्थानन्दस्वामिपादेन यतिवरेण श्रीरामकृष्णभगवत्पादोपदेशे विविधप्रस्थानसमन्वयः प्रदर्शितः स्वीयबन्धे। रघूपाह्वेन गोपीकृष्णेन देवतार्थकप्रत्ययानाम् अर्थविवरणं सुष्ठु प्रतिपादितम्। अर्थवत्सूत्रे प्रत्ययान्तस्य पर्युदासरहस्यं प्रकटितं मण्डलोपाह्वेन राजकुमारेण। रघुवंशमहाकाव्यस्य तृतीयतुरीयसर्गयोः मत्वर्थीयप्रयोगस्य विमर्शः उपस्थापितः नायेकोपाह्वेन शान्तनुना। अनूदितसाहित्यं कथम् आधुनिकसंस्कृतसाहित्यस्य विकसने समर्थं भवति इति सुष्ठु प्रत्यपादि वरोपाह्वया मौमितया। भूमशब्देन परमानन्दः उच्यते श्रुतौ। वर्णाश्रमधर्मपरिपालनेन कथं भूमलाभः इति विचारितं बर्मनोपाह्वया वनानीवर्यया। मिश्रोपाह्वेन नीलाचलेन किन्नराणां विषये रोचकाणि शोधलब्धानि तथ्यानि प्रत्यपादिषत।

पत्रिकायाः प्रकाशनार्थं नियतम् अस्मान् प्रोत्साहितवद्भ्यः सम्माननीयप्रतिकुलाधिपतिभ्यः, पूज्यकुलपतिभ्यः, पत्रिकायाः प्रकाशकेभ्यः विश्वविद्यालयस्य माननीयकुलसचिवेभ्यः, पत्रिकायाः टङ्कनकार्ये अक्षरपरिष्कारादिकार्ये च साह्यम् आचरितवद्भ्यः अस्माकं विभागस्य शोधच्छात्रेभ्यः, संस्कृताध्ययनविभागस्य समायोजकेभ्यः स्वामिजपसिद्धानन्देभ्यः, मुद्रकेभ्यः, सर्वेभ्यः प्राबन्धिकेभ्यः च वयं सविनयं धन्यवादं वितरामः अस्मिन् प्रसङ्गे।

भगवतः अनुकम्पया पत्रिकायाः प्रकाशनस्रोतः अविच्छिन्नं भवत्विति सम्प्रार्थ्य विरमामः।

सम्पादकाः

RAMAKRISHNA MISSION VIVEKANANDA EDUCATIONAL AND RESEARCH INSTITUTE
(Formerly known and Ramakrishna Mission Vivekananda University)
(Declared by Government of India under Section 3 of UGC Act, 1956)
PO Belur Math, Dist Howrah 711202, West Bengal, India

# Foreword

ॐ वाङ्मे मनसि प्रतिष्ठिता। मनो मे वाचि प्रतिष्ठितम्। आविराविर्म एधि। वेदस्य म आणीस्थः श्रुतं मे मा प्रहासिनीरनेनाधीतनाहोरात्रान् सन्दधाम्यृतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु मामवतु वक्तारम्।

ॐ शान्तिः शान्तिः शान्तिः॥

Om. May my speech be established in the mind, and in turn let my mind be established in speech. O Self-effulgent Brahman (the Supreme Being)! Reach me through and through! May my speech and mind be capable of revealing to me the inner meaning of the Vedic mantras. Let my learning never leave me [but be a constant source of inspiration and guidance]. May I be attuned day and night to the spirit of the Holy Scriptures that I have learnt. May I be truthful in speech and in thought. May the Supreme Being (Brahman) protect me (the disciple). May Brahman protect my teacher. [I repeat,] may He protect me and protect my teacher. May He protect my teacher. Om Peace, Peace, Peace!

The present issue of our Research Journal *Prajñāloka* of the Department of Sanskrit Studies,

which has since been rechristened as the Department of Sanskrit and Philosophy with enlarged scope of academic achievement, under the School of Indian Heritage, Ramakrishna Mission Vivekananda Educational and Research Institute, is now being published after some delay. It was to have been published on the occasion of the University Foundation Day on 4 July 2021. This journal, as mentioned in my Foreword to an earlier issue, is a reverential attempt to worship surabharati by our faculty of the Department of Sanskrit Studies. Our hearty congratulations to the faculty members of the Department on this sustained effort and tenacious pursuit of this literary endeavour. May Surabharati Medhadevi Vagdevi Saraswati illumine our hearts by making them Her eternal abode and bless us with the awakening and blazoning of the Light of Wisdom, *Prajñāloka*, is the humble prayer of

Belur Math<br>
4 July 2021

Swami Atmapriyananda<br>
Pro-Chancellor

# ईशावास्योपनिषत्प्रमेयनिरूपणे तात्पर्यलिङ्गाश्रयत्वविमर्शः

**चन्दनमुखार्जी***

## १. प्रस्तावना

'तत्त्वमसि' इति महावाक्य-श्रवण-मनन-निदिध्यासनेन आत्मकामस्य 'अहं ब्रह्मास्मि' इत्याकारोऽनुभवो जायते। केवलं श्रवणमात्रेण एतादृशपरोक्षप्रतीतिर्नैव सम्भवेत्, असकृच्छ्रवण-मनन-निदिध्यासना-न्याचरितव्यानि। तदा कालेनापरोक्षानुभूतिर्भवति। श्रवणं नाम वेदान्तवाक्यानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणम्। अर्थाद् वेदान्तवाक्यानि प्रमेयगतं जीवब्रह्मैक्यं प्रतिपादयितुं पर्यवसितानि। परन्तु वेदान्तवाक्यानां तात्पर्यावधारणं कथं सम्भवेद् इति महान् संशयः समापन्नः। उच्यते च वेदान्तसारे– 'श्रवणं नाम षड्विधलिङ्गैरशेषवेदान्तानाम् अद्वितीयवस्तुनि तातपर्यावधारणम्' इति। अत्र केचन विशयाः विशेषेण समागताः, यथा–

- किं नाम तात्पर्यम्?
- लोकवेदानुसारं तद्विभागो वर्तते न वा?
- तस्यावधारणं वा कथं स्यात्?
- षड्विधानि लिङ्गानि कानि?
- कथं षड्विधलिङ्गैः तात्पर्यावधारणम्?
- ईशावास्योपनिषत्प्रमेयनिरूपणे कथं तात्पर्यलिङ्गाश्रयणम्?

तेषाम् एव संशयानां समाधानमुखेनायं लेखो वर्तते। किञ्चेशावास्योपनिषच्-छाङ्करभाष्यानुसारम् अद्वैतस्य ब्रह्मणः प्रतिपादनाय तात्पर्यलिङ्गानां व्यवस्था कथं वर्तते तद् अत्रालोचयिष्यते।

## २. तात्पर्यशब्दार्थनिर्णयः

साधारणतया तात्पर्यशब्दस्यार्थोऽभिप्राय इति वक्तुं शक्यते। तात्पर्यशब्दस्य व्युत्पत्तिः, प्रतिसम्प्रदायं तस्य स्वरूपं चेत्यादयो विषया विचार्यन्ते।

---

* संशोधकः, संस्कृतदर्शनविभागः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्

## २.१. व्युत्पत्तिः

तत् अर्थः, सः परो यस्य सः तत्परः इति बहुव्रीहिसमासः। तत्परो नामार्थपर इत्यर्थः। तत्परस्य भावः तात्पर्यम् इति भावे ष्यञ्प्रत्ययेन तात्पर्यशब्दो व्युत्पन्नः। शब्दो वाक्यं वा यदर्थपरन्नाम यस्मिन्नर्थे समागतं, तत्प्रतीति-जनन-योग्यत्वं तात्पर्यम् इति तात्पर्यशब्दव्युत्पत्तिः।

## २.२. न्यायमते तात्पर्यशब्दार्थः

नैयायिकैर्वक्तुरिच्छा तात्पर्यम् इति स्वीक्रियते। उक्तं तावद् भाषापरिच्छेदे– 'आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्'[1] इति। अस्माच्छब्दाद् वाक्याद् वेयम् अर्थप्रतीतिरस्त्विति वक्तुरिच्छैव तात्पर्यम्।

## २.३. व्याकरणमते तात्पर्यशब्दार्थः

वक्तुरिच्छा तात्पर्यमिति स्वीक्रियते चेद्वेदे तात्पर्यलक्षणस्याव्याप्तिः स्यात्। वेदो न पुरुषकृतः, न वा पुरुषेणोच्चारितः। तस्माद् वैयाकरणा ईश्वरेच्छा तात्पर्यम् इत्यङ्गीकुर्वन्ति। प्रोक्तञ्च– 'एतद् वाक्यम् एतत् पदं वैतदर्थबोधायोच्चारणीयम् इतीश्वरेच्छा तात्पर्यम्' इति।

## २.४. वेदान्तमते तात्पर्यशब्दार्थः

अद्वैतवेदान्तमतेऽशेषवेदान्तानाम् अद्वितीये ब्रह्मण्येव तात्पर्यम्। 'यस्य वाक्यस्य तात्पर्यविषयीभूतसंसर्गो मानान्तरेण न बाध्यते तद्वाक्यं प्रमाणम्'[2] इत्यागमलक्षणं प्रदर्शितं वेदान्तपरिभाषायाम्। यस्य वाक्यस्य तात्पर्येण विषयसंसर्गो नान्येन केनचित् प्रमाणेन बाध्यते तद् वाक्यम् आगमः। अत्रापि तात्पर्यस्य महती भूमिका विद्यते। वाक्यार्थबोधे चत्वारि कारणानि भवन्ति– आकाङ्क्षा, योग्यता, आसत्तिः, तात्पर्यज्ञानञ्चेति। तात्पर्यं वाक्यार्थबोधकारणत्वेन स्वीकृतं वेदान्तिना। उच्यते तावत्– 'तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्'[3] इति। अर्थादिष्टस्यार्थस्य प्रतीतिजननसामर्थ्यम् एव तात्पर्यम्। तादृशप्रतीतिजननयोग्यतावशाद् भोजनकाले 'सैन्धवम् आनय'

---

१ भाषापरिच्छेदः, कारिका ८४

२ वेदान्तपरिभाषायाः आगमपरिच्छेदे

३ वेदान्तपरिभाषायाः आगमपरिच्छेदे

इत्युच्चारितेऽश्वं विहाय लवणम् एवानयति। प्रकरणभेदात् सैन्धवम् आनयेति वाक्यस्थसैन्धवशब्दः तात्पर्यवशाल्लवणम् एव बोधयति, न त्वश्वम्।

ननु भोजनप्रकरणे सैन्धवशब्दाद् अश्वार्थप्रतीतिर्मास्तु, परन्तु लवणप्रतीतिरेव भवत्विति धिया इच्छाधिक्याल्लवणप्रतीतिः, तेन योग्यतासत्त्वेऽप्यश्वार्थो नैव प्रतीयते। अत्र वक्तुरिच्छैव प्रधाना, न तु तात्पर्यम् इति चेन्न, प्रोक्तञ्च– 'तदितरप्रतीतिजननेच्छयाऽनुच्चारितत्वे सति तत्प्रतीतिजननयोग्यत्वं तात्पर्यम्'[४] इति। इदम् एव तात्पर्यस्य लक्षणम्। यथा 'सैन्धवम् आनय' इति वाक्यस्थसैन्धवशब्दः लवणेतराश्वप्रतीतिजननेच्छयानुच्चारितः, किञ्च लवणप्रतीतियोग्यतया तात्पर्यं जनयति।

एवं तत्प्रतीतिजननयोग्यत्वे सति तदन्यमात्रप्रतीतीच्छयानुच्चारितत्वम् इति तात्पर्यस्य निष्कृष्टं लक्षणं सिद्धम्। अस्तु, तात्पर्यं तु लक्षितम्। परन्तु तस्यावधारणं कथं भवेत्? तस्माद् अग्रिमः प्रपञ्चः प्रदर्श्यते।

## ३. तात्पर्यावधारणप्रक्रिया

लौकिकवैदिकभेदेन शब्दो द्विविधः। तस्मात् तयोः शब्दयोः तात्पर्यावधारणप्रक्रियापि परस्परं भिद्यते। वैदिकशब्दानां तात्पर्यावधारणं भिन्नतया क्रियते। लौकिकशब्दानां तात्पर्यावधारणञ्च भिन्नतया क्रियते। वैदिकशब्दानां तात्पर्यावधारणं लौकिकशब्दानां तात्पर्यावधारणात् किञ्चिद् भिद्यत एव। लौकिकवैदिकयोः शब्दयोः तात्पर्यावधारणं कथं क्रियते तदत्र यथामति वर्ण्यते।

### ३.१. वैदिकशब्दानां तात्पर्यावधारणम्

वैदिकशब्दानां तात्पर्यं पूर्वोत्तरमीमांसापरिशोधितन्यायेन निश्चीयते। मीमांसा नाम पूजितविचारवचनः। विचारं विना वैदिकवाक्यानां तात्पर्यं नैवावगम्यते। वेदानां मन्त्रब्राह्मणारण्यकरूपस्य पूर्वभागस्य तात्पर्यावगमनार्थं पूर्वमीमांसा प्रवर्तिता। किञ्चान्तिमभागस्योपनिषद्भूतस्य वेदोत्तरभागस्य तात्पर्यावगमनार्थम् उत्तरमीमांसा वेदान्तो वा प्रवर्तितः। पुनः केषाञ्चिन् मते वैदिकानां वाक्यानाम् अधिकरणद्वारा, पुनरुपक्रमणादिना च तात्पर्यनिर्णयः

[४] वेदान्तपरिभाषायाः आगमपरिच्छेदे

कर्तव्यः। अधिकरणलक्षणं तावत्–

विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं विदुः॥ इति।

तेन विषय-संशय-पूर्वपक्षो-त्तरपक्ष-सङ्गतिभिः पञ्चभिरङ्गैर्वैदिक-वाक्यानां तात्पर्यनिर्धारणं क्रियत इति तु सम्प्रदायसिद्धम् एव।

## ३.२. लौकिकशब्दानां तात्पर्यावधारणम्

लोकेषु भवाः लौकिकाः। लौकिकवाक्यानान्तात्पर्यं प्रकरणादिना स्वीकर्तुं शक्यते। प्रोक्तञ्च–

अर्थात् प्रकरणाल्लिङ्गाद् औचित्याद् देशकालतः।
शब्दार्थास्तु विभिद्यन्ते न रूपाद् एव केवलात्॥ इति

केवलं शब्दरूपाच्छब्दवैचित्र्याद् वा शब्दार्थाः न विभज्यन्ते। अर्थात् प्रकरणाल्लिङ्गाद् औचित्याद् देशात्कालाच्च शब्दार्था विभिद्यन्ते। तस्माल् लौकिकवाक्यानां तात्पर्यावगमनायार्थादयो विनियुज्यन्ते। तेनैव लौकिकवाक्यानां तात्पर्यम् अवगम्यते।

## ३.३. लौकिकवैदिकवाक्यानां प्रामाण्यम्

लौकिकवैदिकवाक्ययोः प्रामाण्यविचार एकं विशेषस्थलं परिलक्ष्यत एव। लौकिकैः शब्दैर्योऽर्थः प्रतिपाद्यते, सोऽर्थः प्रत्यक्षप्रमाणादिनावगतो भवति। तस्मिन्नर्थेऽपूर्वं न तिष्ठति। तस्माल् लौकिकवाक्यानां प्रमाणान्तरावगतत्वं वर्तते। तस्माल् लौकिकवाक्यानि अनुवादपराणि। अतो लौकिकवाक्यानां नास्ति अपूर्वार्थ-प्रतिपादकरूप-स्वतःप्रामाण्यम्। किन्तु वैदिकवाक्यानां मानान्तरावगतत्वं नैव वर्तते। अन्येन केनापि प्रमाणेन वैदिकवाक्यार्थस्य ज्ञानं न सिध्यति। तस्माद् अपूर्वार्थप्रतिपादकत्वाद् वैदिकवाक्यानां स्वतःप्रामाण्यं सिद्धम्। उक्तं तावद् वेदान्तपरिभाषायां– 'तत्र लौकिकवाक्यानां मानान्तरावगतार्था-नुवादकत्वम्। वेदे तु वाक्यार्थस्यापूर्वतया नानुवादकत्वम्' [५] इति।

## ४. षड्विधानि तात्पर्यलिङ्गानि

अधुना लिङ्गम् उच्यते– लीनम् अर्थं गमयतीति लिङ्गम्।

[५] वेदान्तपरिभाषायाः आगमपरिच्छेदे

व्याप्तिवशाद् यद् यस्य गमकं तत् तस्य लिङ्गम् इति। तात्पर्यनिर्णयाय लिङ्गं तात्पर्यलिङ्गम् इति कृत्वा प्रकृतशब्दस्य व्युत्पत्तिः।

अर्थाद् उपनिषद्भूतानाम् अशेषवेदान्तवाक्यानाम् अद्वितीये वस्तुनि ब्रह्मणि तात्पर्यावधारणाय प्रयुक्तानि लिङ्गान्येव तात्पर्यलिङ्गानीति फलितार्थः। एतानि तात्पर्यलिङ्गानि व्याप्तिबलेन ब्रह्मणो गमकानि, तस्माद् एतानि वाक्यान्युपनिषत्प्रतिपाद्यब्रह्मणो लिङ्गानि। एतैः तात्पर्यलिङ्गैरेव गुरूपदिष्ट-वेदान्तवाक्यं जीवब्रह्मैक्यतात्पर्यं गम्यते। तस्माद् एवाशेषवेदान्त-वाक्यानां ब्रह्मण्येव तात्पर्यम्। सर्वाणि चोपनिषद्वाक्यानि ब्रह्मण्येव पर्यवसितानि।

तात्पर्यलिङ्गानि तावत् षड्विधानि। उपक्रमोपसंहारौ, अभ्यासः, अपूर्वता, फलम्, अर्थवादः, उपपत्तिश्चेति। उच्यते तावद्वेदान्तसारे– 'लिङ्गानि तु उपक्रमो-पसंहारा-भ्यासा-पूर्वता-फला-र्थवादो-पपत्त्याख्यानि' इति। प्रोक्तञ्च बृहत्संहितायां–

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥ इति

एवं षड्विधैः तात्पर्यलिङ्गैर्वेदान्तवाक्यानाम् एकस्मिन्नेव तात्पर्यावधारणं श्रवणम्। कथं षड्विधानि लिङ्गानि श्रवणकोटौ वेदान्तवाक्यानां तात्पर्यं ग्राहयन्ति तद् अत्रालोच्यते। तात्पर्यलिङ्गानाम् उपनिषदुक्तवचनेन सह समन्वयः प्रदर्श्यते।

## ४.१. उपक्रमोपसंहारौ

प्रथमं तात्पर्यग्राहकं लिङ्गम् उपक्रमोपसंहारौ। उपक्रमश्च उपसंहारश्च उपक्रमोपसंहारौ। उपक्रमः आरम्भः, उपसंहारः परिसमाप्तिः। ग्रन्थेषु मुख्यः प्रतिपाद्यो विषयः क इति ज्ञातुम् उपक्रमोपसंहारौ वदति ग्रन्थकारः। कस्यचित् प्रकरणस्यादावन्ते च यदि समान एव विषयः प्रतिपाद्यते, तेन प्रकरणस्यास्य मुख्यो विषयः स एवेति स्वीकर्तव्यम्। उपक्रमे प्रतिपाद्यस्य विषयस्योपपादनं तिष्ठति। उपसंहारे च प्रतिपादितविषयस्योपपादनं वर्ण्यते। तथोक्तञ्च वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयोरुपपादनम् उपक्रमोपसंहारौ' इति। एवम् उपक्रमोपसंहाराभ्यां प्रकरणस्य तात्पर्यावधारणम्।

### ४.२. अभ्यासः

द्वितीयं तात्पर्यग्राहकं लिङ्गम् अभ्यासः। अभ्यासो नामासकृद् आवृत्तिः। उपक्रमोपसंहाराभ्यां प्रतिपाद्यस्य वस्तुनः पुनः पुनः प्रतिपादनम् अभ्यासः। एकस्मिन् एव सन्दर्भे पौनःपुन्येन समानवस्तुन एव निर्देशः। एवम् एकस्मिन् एव प्रकरणे उपक्रमाद् आरभ्योपसंहारपर्यन्तं निर्दिष्टस्य वस्तुनः पुनः पुनः उपपादनम् अभ्यासः। प्रोक्तञ्च वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यासः' इति।

### ४.३. अपूर्वता

तृतीयं तात्पर्यग्राहकं लिङ्गम् अपूर्वता। उपक्रमोपसंहाराभ्यासैर्-ब्रह्मोपदेशे जाते ब्रह्मविषयकः संशयो जायते। तदा संशयस्य नाशोऽपूर्वेणैव क्रियते। सन्देहनिराकरणे हेतुरपूर्वता। प्रकरणे यद् वस्तु प्रतिपाद्यते, तस्य प्रामाण्यम् अन्येन केनापि भिन्नेन प्रमाणेन साधयितुं न शक्यम्। उच्यते वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तराविषयीकरणम् अपूर्वता' इति। अर्थाद् अद्वितीयवस्तुनः प्रमाणान्तरेण अविषयीकरणम् अपूर्वता। यो विषय आगमप्रमाणेन ज्ञायते सो भिन्नेन केनचित् प्रमाणेन न ज्ञायते चेत्स एव प्रमाणान्तराविषयः।

### ४.४. फलम्

चतुर्थं तात्पर्यग्राहकं लिङ्गं तावत् फलम्। प्रयोजनं विहाय मन्दो न प्रवर्तते, तर्हि विदुषां का कथा? उपक्रमोपसंहाराभ्यां प्रतिपाद्यस्याभ्यासेन चर्चितस्यापूर्वेण प्रमाणान्तराविषयस्य च वस्तुनः प्रयोजनं किम् इति जिज्ञासा समुदेति। तदा प्रयोजनमाध्यमेन तात्पर्यम् अवगमयितुं वेदान्तसारकृतोच्यते– 'फलं तु प्रकरणप्रतिपाद्यस्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्' इति। प्रयोजने ज्ञाते तस्य वस्तुनः सन्दिग्धता नश्यति। आत्मविज्ञानप्रकरण आत्मज्ञानस्य यत् प्रयोजनं श्रूयते तद् एव फलम्। तेनैव तात्पर्यसिद्धिः।

### ४.५. अर्थवादः

पञ्चमं तात्पर्यग्राहकं लिङ्गं तावद् अर्थवादः। उच्यते वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवादः'

इति। अर्थवादलिङ्गेनापि प्रकरणप्रतिपाद्यं वस्तु ज्ञातुं शक्यते। प्रशंसानिन्दापरकं वाक्यम् अर्थवादः। विधेयस्य प्रशंसनम् अर्थवादः। केवलं विधिमात्रेण पुरुषस्य प्रवृत्तिर्भवितुन्नार्हति। तत्र प्रशंसा श्रूयते चेत् पुरुषस्य प्रवृत्तिरनुकूला भवति। इयं गौः क्रेतव्येति क्रयविधिना पुरुषस्य गोक्रयणे प्रवृत्तिर्नैव दृश्यते। तस्मात् प्रशंसाज्ञापनायेयं बहुक्षीरेत्यर्थवादवाक्यं प्रयुज्यते। तदा गोक्रयणे पुरुषस्य प्रवृत्तिरनुकूला जायते। अर्थवादेन प्रशंसायां सत्यां विधिविहितकर्मसु पुरुषस्यावसन्नं चित्तम् उन्मुखं भवति। जैमिनीयसूत्रम् अप्यत्र प्रमाणं– 'सन्दिग्धेषु वाक्यशेषात्'[६] इति। अर्थाद् विधिना प्रदर्शितेऽर्थे सन्देहः स्याच् चेत् तत्र वाक्यशेषेणार्थवादेन वार्थनिर्णयः कर्तव्यः। एवं विधिवाक्यानां तात्पर्यं निर्णेतुम् अर्थवादलिङ्गस्य विद्यते महती भूमिका।

### ४.६. उपपत्तिः

अन्तिमं तात्पर्यग्राहकं लिङ्गं तूपपत्तिः। नानाविधैः दृष्टान्तैः उपक्रान्तस्यार्थस्य व्यवस्थापनम् एवोपपत्तिः। प्रोक्तं वेदान्तसारे– 'प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः' इति। अर्थाद् उपपत्तिर्नाम युक्तिः। उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् अर्थवादश्चेत्यादयो यथाक्रमं प्रकरणप्रतिपाद्यस्याद्यन्तोपपादनं, पौनःपुन्येन प्रतिपादनं प्रमाणान्तरा-विषयीकरणं प्रयोजनं प्रशंसनं च कुर्वन्ति। परन्तु प्रकरणप्रतिपाद्यवस्तुसिद्धये संशयसन्देहाक्षेपरूपाणि नानाविधानि विप्रतिपत्तिवाक्यानि च खण्डयन्ती प्रकरणप्रतिपाद्यवस्तु युक्त्या मण्डयत्युपपत्तिः।

## ५. ईशावास्योपनिषत्

सर्वासूपनिषत्सु प्रायः लघुकायेयम् ईशावास्योपनिषत्। यद्यपि कायेन लघ्वी तथाप्यस्याः माहात्म्यं गुरुत्वञ्च सर्वैः सुविदितम् एव। तस्माद् एव वैदिकज्ञानपरम्परायाम् इयम् उपनिषद् अग्रगण्या।

### ५.१. ईशावास्योपनिषदः नामकरणम्

उपनिषदां नामकरणं नैकविधं भवितुम् अर्हति। कुत्राप्यादिशब्दं प्रथमशब्दद्वयं वा दृष्ट्वा नामकरणं, क्वचिच्च विषयप्रतिपादनदृष्ट्या

---

६ जैमिनीयसूत्रम् (१/४/२९)

नामकरणं, कदाचिन् मन्त्रब्राह्मणारण्यकानुसारं नामकरणं, क्वचिद् आख्यायिकानुसारं नामकरणं, कदाचिद् वा प्रश्नप्रतिवचनानुसारं नामकरणं तु दृश्यत एव। यथा प्रश्नोपनिषदि पिप्पलादं प्रति कबन्ध्यादिभिः पृष्टान् षड् प्रश्नान् आश्रित्य प्रश्नोपनिषदो नामकरणं विहितम्। यथा वा 'केनेषितं पतति प्रेषितं मनः' इत्यत्र केनेत्यादिशब्दम् आधारीकृत्य केनोपनिषद् इति नामकरणं जातम्। किञ्च शुक्लयजुर्वेदस्य बृहदारण्यके पठितत्वात् सुबृहत्कलेवरत्वाच्च बृहदारण्यकोपनिषदो नामकरणं, काठकब्राह्मणे पठितत्वात् कठोपनिषद् इति नामकरणम्।

तथा 'ईशावास्यम् इदं सर्वं यत्किञ्च जगत्यां जगत्' इत्येवं रूपेणारब्धाष्टादशमन्त्रात्मिकेयम् ईशावास्योपनिषत्। ईशा वास्यम् इति शब्दद्वयम् आश्रित्यास्या उपनिषदो नामकरणं जातम् ईशावास्योपनिषद् इति। केचन केवलम् ईशाशब्दम् आश्रित्यापीशोपनिषद् इति नाम्ना व्यवहरन्ति। पुनः शुक्लयजुर्वेदस्य मन्त्रभागे पठितत्वाद् इयं मन्त्रोपनिषद् इति नाम्नापि प्रख्याता। केचन मन्यन्ते यद् वाजसनेयसंहितायां पठितत्वाद् इयम् ईशावास्योपनिषद् वाजसनेयसंहितोपनिषत्।

## ५.२. ईशावास्योपनिषदः स्थानम्

शुक्लकृष्णभेदेन यजुर्वेदो द्विधा विभक्तः। तत्र शुक्लयजुर्वेदस्यापरं नाम वाजसनेयी संहिता। इयं संहिताध्यायैर्विभक्ता। पुनः प्रत्येकम् अध्यायोऽनुवाकैर्विभक्तः। एवं प्रत्येकम् अनुवाको मन्त्रैर्विभाजितः। सर्वम् आहत्य वाजसनेयसंहितायां चत्वारिंशद् अध्यायाः, त्र्युत्तरत्रिंशद् अनुवाकाः, पञ्चदशोत्तरनवदशशतं मन्त्राश्च वर्तन्ते। संहिताया अस्याः चत्वारिंशत्तमोऽध्याय एवेशावास्योपनिषत्।

शुक्लयजुर्वेदस्य शाखाद्वयं प्रसिद्धं– माध्यन्दिनशाखा काण्वशाखा च। एवं काण्व-माध्यन्दिन-भेदेनेयम् उपनिषद् अपि द्विधा पठिता, मन्त्रभेदोऽपि दृश्यते। काण्वशाखायाम् अष्टादश मन्त्राः प्राप्यन्ते। परन्तु माध्यन्दिनशाखायां केवलं सप्तदश मन्त्रास्सन्ति। पुनः शाखाभेदेनोपनिषदो बहवः पाठभेदाः दृश्यन्ते।

## ५.३. ईशावास्यस्य समयः

ईशावास्यस्य समयनिर्धारणम् अतीव दुष्करम्। तथापि काश्चन

युक्तयोऽवश्यम् एव तस्या इतरापेक्षया प्राचीनतां प्रतिपादयन्ति। विषयेऽस्मिन् विदुषां मतभेदाः भिद्यन्त एव। आदौ वेदविभागस्य क्रमः ज्ञातव्यः। मन्त्रभागाः पूर्वम् आगताः, ततो ब्राह्मणानि, तत आरण्यकानि, तत उपनिषदः। अर्थाद् मन्त्रब्राह्मणारण्यकोपनिषदः पस्परम् उत्तरोत्तरकाले स्थिताः। अर्थाद् मन्त्रभागे पठितोपनिषद् इतरापेक्षया ब्राह्मणारण्यकस्थोपनिषदपेक्षया प्राचीना भवतीति तु सिद्धम्। तथेशावास्योपनिषद् वाजसनेयसंहितायाः मन्त्रभागे पठिता। तस्माद् एव मन्त्रभागस्य पूर्वकालवर्तित्वाद् ईशावास्यस्य काल इतरापेक्षया प्राचीन इति तु निःसन्देहम्। मुक्तिकोपनिषद्यप्यादावेव मुख्यासूपनिषत्स्वीशावास्योपनिषदो नाम श्रूयते– 'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्यतित्तिरिः' इति। सर्वाणि तथ्यानि पर्यालोच्येदं वक्तुं शक्यते यद् ईशावास्यस्य समयः खृष्टपूर्वसप्तमशतकम् इति विमर्शकाः।

## ५.४. ईशावास्यस्य ऋषिः

प्रतिवेदं प्रतिसूक्तं च भिन्ना ऋषयः, भिन्नानि च्छन्दांसि, भिन्ना देवताः, भिन्ना विनियोगाश्च वर्तन्ते। मन्त्रार्थस्य सम्यक्परिज्ञानाय केवलं मन्त्राणाम् अक्षरार्थः पर्याप्तो नास्ति। मन्त्राणाम् ऋषिच्छन्दोदेवताविनियोगज्ञानम् अपि अपेक्ष्यते।

ईशावास्योपनिषद ऋषिः मन्त्रद्रष्टा वा क इति प्रश्ने नानाविधाः सम्प्रदायसिद्धान्ताः समाधानत्वेनागच्छन्ति। केचन मन्यन्ते दध्यङ्ङाथर्वण अस्या उपनिषद ऋषिरासीत्, केचन दधीचाथर्वणं स्वीकुर्वन्ति, पुनरपरे दधीचिरिति वदन्ति, अन्ये तु दीर्घतमा इति प्रतिपादयन्ति। केचन स्वयम्भुवं मनुम् एव ऋषित्वेनाङ्गीकुर्वन्ति।

## ६. ईशावास्योपनिषदि तात्पर्यलिङ्गानि

सर्वासूपनिषत्सु प्रायो लघुकाया शुक्लयजुर्वेदीयेयम् ईशावास्योपनिषत्। यद्यपि कायेन लघ्वी तथापि अस्याः माहात्म्यं गुरुत्वञ्च सर्वैः सुविदितम् एव। तस्माद् एव वैदिकज्ञानपरम्परायाम् इयम् उपनिषद् अग्रगण्या। दर्शन-श्रवण-मनन-विज्ञानाद्युपाधिधर्मैराविर्भूतं भवति ब्रह्म। दर्शन-श्रवण-मनन-निदिध्यासनेन ब्रह्म गुहायां चरति। तथाविधं ब्रह्म निर्धारयितुम् ईशोपनिषत्स्थितानां षण्णां तात्पर्यग्राहकलिङ्गानाम् अत्यन्तम्

आवश्यकता वर्तते। ईशोपनिषद्वाक्यानि परमे ब्रह्मणि पर्यवसितान्युत नेति परिशीलयितुं तान्यत्रालोच्यन्ते।

## ६.१. उपक्रमोपसंहारौ

उपक्रमश्चोपसंहारश्चोपक्रमोपसंहारौ। उपक्रम आरम्भः, उपसंहारः परिसमाप्तिः। एवम् उपक्रमोपसंहाराभ्यां प्रकरणस्य तात्पर्यावधारणम्। सर्वासाम् एवोपनिषदां परं लक्ष्यं ब्रह्मावगमनम्। तत्रैव सर्वासाम् उपनिषदां तात्पर्यम्। तथा परब्रह्मणो निर्विशेषत्व-शुद्धत्वा-कर्तृत्वा-भोक्तृत्वादिरूपं प्रतिपादयितुम् ईशोपनिषत् पर्यवसिता। तत्रैव 'ईशावास्यम् इदं सर्वम्'[७] इत्यनेन परमात्मन उपक्रमः। अर्थाद् इदं सर्वम् ईश्वररूपेणाच्छादितम्। एवं प्रकरणप्रतिपाद्यस्यादौ प्रतिपादनम् उपक्रमः। पुनः 'स पर्यगाच्छुक्रम् अकायम् अव्रणम् अस्नाविरं शुद्धम् अपापविद्धम्'[८] इत्युपसंहारः। तस्यैवान्ते प्रतिपादनम् उपसंहारः। एवम् उपक्रमाद्युपसंहारपर्यन्तं परमात्मन एव प्रकरणम्। उपक्रमोपसंहाराभ्याम् इदं प्रकरणं परमात्मन एवेति तात्पर्यम्।

## ६.२. अभ्यासः

द्वितीयं तात्पर्यग्राहकं लिङ्गं भवत्यभ्यासः। अभ्यासो नाम असकृद् आवृत्तिः। उपक्रमोपसंहाराभ्यां प्रतिपाद्यस्य वस्तुनः पुनः पुनः प्रतिपादनम् अभ्यासः। मन्त्राणां नास्ति जामिता। जामिता नामालस्यम्। एकस्या एव क्रियायाः पौनःपुन्येनानुष्ठानेन निद्रागच्छतीति तु दोषाय। इत्थं दोषो मन्त्राणां तु नास्त्येव। पुनः पुनर्मन्त्रैरर्थप्रतिपादने नास्ति तत्रालसताया अवसरः। प्रोक्तञ्च वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य वस्तुनस्तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यासः' इति। एवं परमात्मनः प्रकरणेऽस्मिन् पौनःपुन्येन तस्य प्रतिपादनं श्रूयते–

तद् एजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः॥

[ईशोपनिषत् ५]

कुत्रचिच्छ्रूयते यद् ब्रह्म एजति नाम कम्पते। पुनः क्वापि तन्न

---

७ ईशोपनिषत् १

८ ईशोपनिषत् ८

कम्पते। अर्थात् स्वभावतोऽचलम् अपि चलतीति तात्पर्यम्। पुनः ब्रह्मतत्त्वं यद् अस्ति तद् अविद्वद्भिर्नैव ज्ञायते। अतोऽविद्वद्भ्यो बहुदूरम् आत्मतत्त्वम्। पुनर्विदुषां प्रत्यगात्मत्वात् तेषां तद्ब्रह्मतत्त्वम् अत्यन्तं समीपवर्ति। एवं विपरीतक्रमेण पुनः पुनः ब्रह्मतत्त्वप्रतिपादनम् अभ्यासः।

## ६.३. अपूर्वता

तृतीयं तात्पर्यग्राहकं लिङ्गम् अपूर्वता। उपक्रमोपसंहाराभ्यासैर्ब्रह्मोपदेशे जाते ब्रह्मविषयी संशयः जायते। तदा संशयस्य नाशोऽपूर्वेणैव क्रियते। सन्देहनिराकरणे हेतुरपूर्वता। प्रकरणे यद् वस्तु प्रतिपाद्यते, तस्य प्रमाणम् अन्येन केनापि भिन्नेन प्रमाणेन साधयितुं न शक्यम्। उच्यते वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य वस्तुनः प्रमाणान्तराविषयीकरणम् अपूर्वता' इति। प्रमाणान्तरेण यन्न गम्यते बुध्यते तद् अपूर्वम्। लक्षणम् इदं ब्रह्मणि अपि सङ्गच्छते। यदि ब्रह्म शब्दप्रमाणेन विना भिन्नेन केनचित् प्रमाणेन गम्यते चेत् तद् अपूर्वं न भवति। ईशोपनिषदि श्रूयते– 'अनेजदेकं मनसो जवीय नैनद् देवा आप्नुवन् पूर्वमर्षत्'[१] इति। श्रुतिसिद्धम् अपरोक्षानुभवजनितं संसारधर्मवर्जितम् आत्मतत्त्वं प्रमाणान्तरागम्यम्। देवाः चक्षुरादीनि इन्द्रियाण्यपीदं तत्त्वं न प्राप्नुवन्ति। अर्थाच्चक्षुरादिभिरिन्द्रियैः आत्मा न गम्यते। केवलं श्रवण-मनन-निदिध्यासितेनैवान्तःकरणेन ब्रह्मावगम्यते। अर्थात् प्रमाणान्तरागम्यत्वाद् ब्रह्मणोऽपूर्वता। एवम् ईशोपनिषदुक्तापूर्वतालिङ्गेन ब्रह्मणः तात्पर्यसिद्धिः।

## ६.४. फलम्

चतुर्थं तात्पर्यग्राहकं लिङ्गं तावत् फलम्। प्रयोजनं विहाय मन्दो न प्रवर्तते, तर्हि विदुषां का कथा। उपक्रमोपसंहाराभ्यां प्रतिपाद्यस्याभ्यासेन चर्चितस्यापूर्वेण प्रमाणान्तराविषयस्य च वस्तुनः प्रयोजनं किमिति जिज्ञासा समुदेति। तदा प्रयोजनमाध्यमेन तात्पर्यमवगमयितुं वेदान्तसारकृतोच्यते– 'फलं तु प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनम्' इति। श्रूयमाणं प्रयोजनं फलम्। तर्हि किं प्रयोजनम् आत्मज्ञानस्य? अज्ञाननिवृत्तिरेवात्मज्ञानस्य फलम्। विधिनिषेधमुक्तेन

---

[१] ईशोपनिषत् ४

जीवन्मुक्तस्वरूपेणावस्थानम् एव फलम्। उच्यते–

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते॥ (ईशोपनिषत् ६)

इति।

अर्थाद्येन ब्रह्मविजीगिषुणा साधनचतुष्टयसम्पन्नेन सर्वाणि स्थावरजङ्गमात्मकानि स्वात्मन्यात्माव्यतिरिक्ततया दृश्यन्ते तस्य सर्वभूतेष्वात्मदर्शनमेव फलम्। आत्मानन्निर्विशेषन्निर्गुणत्वेन सर्वप्रत्ययसाक्षिभूतत्वेन च पश्यत्यतो घृण्यस्वभावविनिर्मुक्ताः सर्वत्र समाना दृष्टिस्तु ब्रह्मैक्यं गमयति। पुनः 'तत्र को मोहः कः शोकः एकत्वम् अनुपश्यतः'[१०] इति। शोको मोहश्च अविद्याकार्यरूपौ सकलकामबीजौ। आत्मसाक्षात्कारेण भेदरहितं जीवब्रह्मैक्यमेवात्यन्तिकं फलम्। सञ्जातायां ब्रह्मविद्यायां शोकमोहयोः समूलोत्खातः। एवं प्रकारेण फललिङ्गेन ब्रह्मणः तात्पर्यसिद्धिः।

## ६.५. अर्थवादः

पञ्चमं तात्पर्यग्राहकं लिङ्गं तावद् अर्थवादः। उच्यते वेदान्तसारे– 'प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवादः' इति। अर्थवादस्य द्विधा विभागः कर्तुं शक्यते– स्तुतिः निन्दा च। प्रशंसापरकं वाक्यं स्तुतिः। निन्दापरकं वाक्यन्निन्दा निषेधो वा। सर्वत्र प्रकरणप्रतिपाद्यस्य प्रशंसामुखेन माहात्म्यन्न गीयते। क्वचिन् निन्दापुरःसरम् अपि प्रकरणाप्रतिपाद्यस्य विधानं क्रियते। यथात्र ईशोपनिषदि निन्दामुखेनात्मप्रकरणभिन्नानां तमसाग्रस्तानामज्ञानिनां निषेधः दृश्यते–

असुर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥ (ईशोपनिषत् ३) इति।

कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति लोकाः। देवानाम् असुराणां च स्वभूताः लोका असुर्याः। ते लोका तमसा ब्रह्मज्ञानव्यतिरिक्तेन चरमाज्ञानेनाच्छादिताः। ये जना अविद्यादिदोषेणात्मानं हिंसन्ति, परमात्मनः स्वरूपावबोधार्थं किञ्चिदपि प्रयासं न कुर्वन्ति, नित्यशुद्धबुद्धमुक्तस्वभावमात्मानं ये

[१०] ईशोपनिषत् ७

न विश्वसन्ति त आत्महनो मृत्योः परं शरीरं त्यक्त्वा निकृष्टयोनिं प्राप्नुवन्ति। अविद्यादिसंसारदोषेण सचक्रं संसरन्ति च ते। अत्र कुटिलेन निन्दापरतयाज्ञानिनां व्यवहारः प्रदर्शितः। परन्तु ये तद्विपरीताः ज्ञानिनः ते मुच्यन्त एवेति तात्पर्यम् अत्र अङ्गीकर्तव्यम्।

## ६.६. उपपत्तिः

अन्तिमं तात्पर्यग्राहकं लिङ्गं तूपपत्तिः। नानाविधैर्दृष्टान्तैरुपक्रान्तस्यार्थस्य व्यवस्थापनम् एवोपपत्तिः। प्रोक्तं वेदान्तसारे– 'प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः' इति। अर्थाद् उपपत्तिर्नाम युक्तिः। प्रकरणप्रतिपाद्यस्यार्थस्य सिद्धये श्रूयमाणा युक्तिरुपपत्तिः। परमं ब्रह्म साधयितुम् ईशोपनिशद्वाक्यं प्रदर्श्यते– 'तस्मिन्नपो मातरिश्वा दधाति'[११] इति। एकविज्ञानेन सर्वविज्ञानम् इत्येवम् उपनिषत्प्रतिपाद्यम्। नित्यमुक्तशुद्धबुद्धस्वभावे सत्येव क्रियात्मकः मातरिश्वा वायुः सर्वप्राणभृद् भवति। सर्वाणि कार्यकारणसङ्घातानि यस्मिन्नोतानि प्रोतानि च भवन्ति तदेव आत्मतत्वम्। जीवानां चेष्टालक्षणानि कर्माणि, अग्नेः ज्वलनदहनलक्षणं, आदित्यस्य प्रकाशलक्षणं, पर्जन्यादेरभिवर्षणादिलक्षणं चात्मतत्वे सत्व एव विभजन्ति। एवं सर्वाणि कार्यकारणलक्षणानि नित्यादिचैतन्यस्वरूपे सत्येव सम्भवन्ति। किञ्च प्रथमजस्य हिरण्यगर्भस्यापि फलप्रदातृत्वं परम् आत्माधीनम्। एवं परमात्मानं विहाय किम् अपि क्षणम् अपि स्थातुं न शक्नोति। अयं स्थावरजङ्गमात्मकः प्रपञ्चोऽपि परमात्मनेशा व्याप्त इत्येकविज्ञानेन सर्वविज्ञानोपपत्तिः। एवम् ईशावास्योपनिषदोऽद्वितीयब्रह्मतात्पर्यनिर्णयः।

## ७. उपसंहारः

शीर्षकाधारेण प्रकृतं लेखं परिशीलयामश्चेदादौ तात्पर्यलिङ्गं वक्तव्यं, तत ईशावास्योपनिषदः परिचयः प्रदातव्यः, अन्तिमे च तत्राद्वैततत्त्वानान्तात्पर्यनिर्णयश्चेत्थं यथामति सम्पूर्णः लेखः विस्तृतः।

## परिशीलितग्रन्थसूची

१. *उपनिषद्भाष्यम्* (खण्डः १); शङ्कराचार्यः; एस. सुब्रह्मण्यशास्त्री (सम्पादकः); वाराणसी- श्रीदक्षिणामूर्तिमठप्रकाशनम्; २०१२।

[११] ईशोपनिषत् ४

२. *अद्वैतवेदान्तसाहित्येतिहासकोशः* ; R Thangaswami; University of Madras; 1980.
३. *वेदान्तपरिभाषा*; श्रीधर्मराजाध्वरीन्द्रः; गजानन शास्त्री मुसलगावकर (सम्पादकः); वाराणसी- चौखम्बा विद्याभवन; २०१५।
४. *शाङ्करवेदान्तकोशः* ; मुरलीधरपाण्डेयः; वाराणसी- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; २०१६।
५. *भामती ओ विवरणेर योगसूत्र (बङ्गपुस्तकम्)*; अमलानन्द; डा. हिमांशु नारायण चक्रवर्ती; यादवपुरविश्वविद्यालय।
६. *शङ्करप्रस्थाने अद्वैतभावना (बङ्गपुस्तकम्)*; मालती मित्र; कोलकाता - प्रोग्रेसिभ पावलिशार्स्; २०१८।

# श्रीरामकृष्णविवेकानन्दीयः सम्प्रदायसमन्वयसिद्धान्तः

**स्वामी वेदार्थानन्दः** *

## ०. भूमिका

श्रीरामकृष्णविवेकानन्दीयः समन्वयसिद्धान्तः अस्माभिरत्र ऐदम्प्राथम्येन प्रतिष्ठापनीयः कोऽपि नवीनो राद्धान्तो नास्ति। अद्वैतदर्शने निष्ठामापन्नस्य जनस्य सहजतया समुत्पद्यमाना दृष्टिरेव अयं समन्वयः। वेदान्तदर्शनस्य नवजागरणकाले विशेषतः श्रीरामकृष्णविवेकानन्दोपदेशैः कीर्तिमापन्ना समन्वयाख्या इयं वेदान्तशास्त्रीया दृष्टिः अस्मद्देशे केवलं न, अपि तु विश्वस्मिन्नपि विश्वे बहुभ्यो वर्षेभ्यो लब्धप्रतिष्ठैव विराजते। तथापि इयं समन्वयवेदान्तभावना अद्वैतशास्त्रन्यायानुसारिणी वा न वेति केषाञ्चित् संशीतिरस्ति, श्रीरामकृष्णविवेकानन्दीयवेदान्तदृष्ट्या उपपन्नप्रतिष्ठस्य नानासम्प्रदायसमन्वयसिद्धान्तस्य स्वरूपम् अद्वैतशास्त्रन्यायानुगुण्येन सङ्क्षेपतः प्रस्तूयते।

## १. सम्प्रदायसमन्वयस्य प्रयोजकम्

समन्वय इति तु वेदान्तसम्प्रदाये न्यायप्रस्थानस्य ब्रह्मसूत्रस्य प्रथमाध्यायः कथ्यते, अविरोध इति च द्वितीयाध्यायः। आपाततो भिन्नार्थबोधकानां वेदान्तवाक्यानां ब्रह्मैकतात्पर्यतया परिग्रहणमेव समन्वय इति तत्र विवक्षितम्। समानतात्पर्यवत्त्वमेव वेदान्तवाक्यसमन्वयं प्रति प्रयोजकम् इत्यर्थः। वेदान्तवाक्यानां समानमेव तात्पर्यञ्चेत् तदेव समानतात्पर्यवत्त्वं वेदान्तवाक्यानां समन्वयं सम्पादयति। वेदान्तानां समन्वये सिद्धे प्रमाणान्तरैः प्रमाणाभासैश्च अविरोधोऽपि अल्पायासेन प्रतितिष्ठति।

एवं यथा उपनिषद्वाक्यसमन्वयं प्रति समानतात्पर्यवत्त्वं प्रयोजकं भवति तथैव श्रीरामकृष्णपरमहंसपादानां नये धर्मभेदानां दर्शनभेदानाञ्च मतसमन्वयं प्रति समानलक्ष्यवत्त्वं प्रयोजकम्। नानाधर्मदर्शनादिसम्प्रदायानां समानमेव लक्ष्यञ्चेत् ते सम्प्रदायाः

* सहायकाध्यापकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध- संस्थानस्य

समन्विताः भवन्ति इति ज्ञायते। अत एव श्रीगुरुमहाराजाः[१] - भूयो भूयः प्रतिपादयन्ति स्म यत् सर्वेषामपि धर्मदर्शनादिसम्प्रदायानां संसारविमोचकम् ईश्वरदर्शनमेव एकं लक्ष्यमिति। साधकावस्थायां गुरुमहाराजपादैः इदं स्वयमेव परीक्ष्य निर्णीतम्। एवं विविधसम्प्रदायानाम् ईश्वरदर्शनरूपसमानलक्ष्यवत्त्वमिति प्रयोजके सिद्धे "यति मतानि तति पन्थानः" इति सर्वसम्प्रदायसमन्वयरूपं प्रयोज्यमपि सिद्धं भवति।

एवञ्च यथा समानतात्पर्यवत्त्वमिति तात्पर्यमवलम्ब्य श्रीशङ्करभगवत्पादादिभिः आचार्यैः वेदान्तवाक्यसमन्वयः सम्पादितः तथैव समानलक्ष्यवत्त्वमिति तत्सदृशं न्यायमवलम्ब्य श्रीरामकृष्णपरमहंसपादैः सम्प्रदायसमन्वयः संस्थापितः इत्युत्पश्यामः।

## २. समन्वयप्रयोजकविषये संशयः

अत्र केचन संशेरते। तद्यथा - सर्वेषामपि धर्मसम्प्रदायानां दर्शनसम्प्रदायानाञ्च एकमेव लक्ष्यं भवति इत्येतन्न युज्यते। कस्मात्। तत्तद्धर्मदर्शनादिसम्प्रदायगताः जनाः स्वेषां लक्ष्यं भिन्नं भिन्नं हि मन्यन्ते। अद्वैतिभिः यादृशं मोक्षस्वरूपम् उच्यते तदेव विशिष्टाद्वैतिभिर्वा द्वैतिभिर्वा नोच्यते। क्रैस्तवधर्मीयैः स्वर्गो यथा कल्प्यते तथैव पूर्वमीमांसकैः न कल्पितः। इस्लामधर्मगतैः कल्प्यमानः स्वर्गस्तु ततोऽपि भिद्यते। एवञ्च तत्तद्धर्मदर्शनादिसम्प्रदायानां लक्ष्यम् एकं नास्तीत्येव समायातम्। अतः सर्वधर्माणां समानलक्ष्यमिति प्रयोजकं न सिद्धम्। प्रयोजकस्य असिद्धौ प्रयोज्यमपि असिद्धमेव तस्मात् सम्प्रदायसमन्वयः असिद्धः इति।

## ३. संशयनिवृत्तिः

अत्र समाधानमपि वेदान्तशास्त्रानुरूपमेव भवति। विविधानां धर्मसम्प्रदायानां दर्शनसम्प्रदायानाञ्च लक्ष्यम् एकमेव इत्येतत् लौकिकानां दृष्टिमवलम्ब्य न भवति, अपि तु भगवतः श्रीरामकृष्णस्य अलौकिकीम् अनुभूतिम् आश्रित्य भवति तथाहि समानमेव तत्त्वं लक्ष्यत्वेन समेऽपि धर्मदर्शनाद्यध्यात्ममार्गाः बोधयन्तीत्येतत् श्रीरामकृष्णविवेकानन्दीयम् अखण्डालौकिकदर्शनमस्ति। अत्र

[१] श्रीरामकृष्णपरमहंसपादाः अत्र क्वचिद् रामकृष्णसङ्घप्रथानुसारं 'गुरुमहाराजाः' इत्यपि निर्दिष्टाः

निदर्शनं भवति गुरुमहाराजैः स्वयं प्रोक्तः हस्त्यन्धदृष्टान्तः। हस्तिनः[२] भिन्नं भिन्नमवयवं हस्तित्वेन गृह्णन्तः अन्धाः परस्परं विवदन्ते। परन्तु सर्वावयवानाम् अवयविनम् अभिन्नम् एकं हस्तिनं यः पश्यति चक्षुष्मान् स तत्त्वदर्शी न विवदते। तस्य दर्शनञ्च अन्येषां मिथ्यादर्शनैः न बाध्यते, सत्यत्वात्। अपि चास्ति पुष्करिणीजलदृष्टान्तः। पुष्करिण्याः विविधघट्टेभ्यः समानमेव जलमादाय भिन्नभिन्नाम् आख्यां प्रदाय जनाः विवदन्ते। किन्तु तत्त्वदर्शी आख्याभेदे सत्यपि वस्तुभेदं नास्तीति पश्यन् न विवदते। स विविधघट्टेषु उपलभ्यमानं वस्तु एकमेव जलमिति परमार्थतो जानाति। न स चिन्तयति यद् एकत्र घट्टे जलं प्राप्यते, परत्र 'पानी', अपरत्र 'अक्वा', अपरत्र च 'वाटर्' इति। तत्त्वदर्शिनो योऽनुभवः स न क्षुद्रदृष्टिसम्पन्नानाम् अनुभवैः बाध्यते। भेददर्शनैरविरुद्धः सन् स विजयते। यथोक्तं श्रीगौडपादाचार्यैः -

स्वसिद्धान्तव्यवस्थासु द्वैतिनो निश्चिता दृढम्।
परस्परं विरुद्ध्यन्ते तैरयं न विरुद्ध्यते ॥

[माण्डूक्यकारिका ३.१७] इति।

सर्वेषु धर्मदर्शनाद्यध्यात्मसम्प्रदायेषु लक्ष्यत्वेन बोधितं तत्त्वम् एकम् एव ईश्वरतत्त्वम् इत्ययं गुरुमहाराजानाम् अखण्डानुभवः लौकिकैः खण्डानुभवैः द्वैतानुभवैः भैदानुभवैः न विरुद्ध्यते, न बाध्यते इति यावत्। अत एव तत्तद्धर्मावलम्बिनां खण्डदृष्टीराश्रित्य न, अपि तु स्वस्य पारमार्थिकीम् अखण्डदृष्टिं समाश्रित्य हि श्रीगुरुमहाराजाः सकलानां सम्प्रदायानां समन्वयाय प्रवर्तन्ते। किञ्च "नेह नानास्ति किञ्चन"[३] इत्ययं सिद्धान्तः सर्वेष्वपि भूतेषु विराजमानस्य अद्वैतात्मनो दर्शनेन खलूपपद्यते। सर्वशरीरेषु एक एवात्मा इत्येतद् दर्शनं लौकिकानाम् आत्मभेददर्शनेन न कदापि बाध्यते। तत्र कारणं हि यथोक्तम् आत्माद्वैतदर्शनं परमप्रमाणभूतश्रुत्युपदेशानुगुणतया समुत्पन्नत्वमस्ति इत्येतत्। न हि परमार्थतत्त्वस्य प्रतिबोधनाय प्रवृत्तां श्रुतिं बाधितुं लौकिकं किमपि प्रमाणान्तरं प्रभवति। अपिच आत्मैकत्वदर्शिनः जीवन्मुक्तत्वं वा कृतकृत्यत्वं वा आप्तकामत्वं वा न कदापि बद्धपुरुषाणां मिथ्यादृष्टिभिः अन्यथयितं भवति।

---

२ षष्ठीविभक्तिरत्र बोध्या।

३ कठोपनिषत् ४.११

यस्य या दृष्टिः तस्य तादृशी मतिश्च गतिश्च स्यादित्यतः मुक्तात्मनाम् आत्मैकत्वदृष्टिः लौकिकानाम् आत्मभेददृष्ट्या यथा न बाध्यते, अपितु अक्षुण्णैव तिष्ठति, तथैव श्रीरामकृष्णविवेकानन्दीया “विविधाध्यात्मसम्प्रदायेषु समानमीश्वरतत्त्वं बोधितम्” इति दृष्टिः लौकिकानां तत्तत्सम्प्रदायावलम्बित्वाभिमानवतामपि जनानां भेदबुद्ध्या कदापि न बाध्यते।

तस्मात् प्रयोजकमस्त्येव। अत एव प्रयोज्यमपि सिद्ध्यति। नानाविधानां धर्मदर्शनादिसम्प्रदायानां समानलक्ष्यवत्त्वम् इति यथोक्तमिदं प्रयोजकं समाश्रित्य नानासम्प्रदायसमन्वयः प्रतितिष्ठत्येव इति सिद्धम्।

**४. उपसंहारः**

सर्वथापि श्रीरामकृष्णविवेकानन्दीयो नानासम्प्रदाय-समन्वयसिद्धान्तः वेदान्तशास्त्रन्यायानुसारी एव भवतीत्यत्र दिङ्मात्रं ह्यत्र प्रदर्शितम्।

## परिशीलितग्रन्थसूची

1. *Śrīśrīrāmakṛṣṇakathāmṛta* (Akhaṇḍa) (Bengali); Śrīma; Kolkata : Udvodhana Kāryālya; 2014.

*Śrīśrīrāmakṛṣṇalīlāprasaṅga* (Vol. 1,2) (Bengali); Swami Saradananda; Kolkata : Udvodhana Kāryālya; 2018. 2. *Vānī o racanā* (Vol. 1-10) (Bengali); Swami Vivekananda; Kolkata : Udvodhana Kāryālya; 2008. 3. *The Works of Sri Sankaracharya* (Sanksrit); Srirangam : Sri Vani Vilas Press; 1910.

✶ ✶ ✶

# देवताप्रत्ययार्थविचारः

डा.गोपीकृष्णन् रघुः *

'सास्य देवता' (अष्टाध्यायी 4.2.24) इतिसूत्रेण प्रथमान्तात् षष्ठ्यर्थे अणादिप्रत्ययाः विधीयन्ते। षष्ठ्यर्थो यद्यपि सम्बन्धः, तथापि तद्धितप्रत्ययस्य सम्बन्धिनि शक्तिरङ्गीक्रियते, ऐन्द्रं हविः इत्यादि सामानाधिकरण्यानुरोधात्। अत्र इन्द्रादेर्देवतात्वोपस्थापकशब्दान्तराभावात्, तेन रूपेणोपस्थितये अणप्रत्ययस्य देवताविशिष्टं देयमित्यर्थः स्वीकर्तव्यः। तस्मात् देवतोद्देशेन त्यज्यमानं द्रव्यम्, तत्र कारणभूतो मन्त्रो वा तद्धितार्थः। उक्तं च–

आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः।
आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्॥ इति।

अनेन च देवतायुक्तदेयद्रव्याभिधायकत्वं तद्धितस्येति लब्धम्। केवलदेवतावाचकत्वं वा, द्रव्यवाचकत्वं वा यद्यङ्गीक्रियते तर्हि आग्नेय इत्यनेन अग्नीषोमीयोऽपि पुरोडाशः उच्येत। उक्तं च तृतीयाध्यायस्य प्रथमपादे

केवलाद्देवतावाची तद्धितोऽग्नेः समुच्चरन्।
नान्ययुक्ताऽग्निदैवत्यं प्रतिपादयितुं क्षमः॥ इति।

अग्नीषोमीय इत्यत्र द्वन्द्वाद्विहितस्तद्धितः व्यासज्यवृत्तिदेवतात्वम् एवाभिधत्ते इति नाग्नेयबोध इति तद्व्याख्यातारः। एवञ्च 'सास्य देवता' (अष्टाध्यायी 4.2.24) इति सूत्रविहितप्रत्ययस्य देवतायां देये च द्रव्ये शक्तिरिति मीमांसकमतमिति ज्ञायते।

पदार्थः पदार्थेन अन्वेति न पदार्थैकदेशेन इति न्यायात् इन्द्रशब्देन साकं देवताविशिष्टदेयपदार्थैकदेशस्य देवतात्वस्य कथमन्वयः इति शङ्कायां समाधानमेवं वदति- प्रत्ययार्थभूते देवतारूपे एकदेशे प्रकृत्यर्थः इन्द्रशब्दो विशेषणं भवति। प्रातिपदिकार्थस्य प्रत्ययार्थैकदेशे देवतायाम् अभेदसंसर्गेणान्वयो भवति। देवतात्वस्य च निरूपकत्वेन देये च अन्वयः। ससम्बन्धिकत्वात् एकदेशान्वयेऽपि

* सहायकाध्यापकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध- संस्थाने

न दोषः। तदुक्तं–

> प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम्।
> अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः॥ इति।

यदा न्यायस्यास्य अविरुद्धतया समाधानमिष्यते तदा पक्षान्तरं भवति। देवतायां प्रदेये च खण्डशः पृथक्पृथक् शक्तिः कल्प्यते। अस्मिन् मते च इन्द्रपदस्य देवतया साकमभेदेनान्वयो भवति। तथा च देवतापदस्य प्रदेयपदेन साकं स्वोद्देश्यकत्यागकर्मत्वसम्बन्धेन अन्वयः।

वस्तुतस्तु यथा चतुर्थ्यादौ प्रकृत्यैव लब्धस्य प्रकृत्यर्थस्य चतुर्थ्या उद्देश्यत्वमात्रमुच्यते, तथा तद्धितेष्वपि देवतात्वं प्रकृत्यर्थः। प्रदेयमात्रं प्रत्ययार्थः। तत्र च निरूपकतासम्बन्धेन देवातत्वस्य अन्वयः।

ननु प्रत्ययस्य देवतानभिधायकत्वे-

> तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः।
> देवताया विधिस्तत्र दुर्बलं तु परं परम्॥

इति प्रबलदुर्बलभावासङ्गतिरिति न शङ्कनीयम्। चतुर्थ्या वाक्याद्देवतात्वसम्बन्धलाभः, तद्धिते समानाभिधानश्रुत्येति श्रुतिलिङ्गाधिकरणन्यायमूलकत्वात्तस्य। तथाहि– देवतात्वस्य सम्बन्धिद्वयसापेक्षत्वेन चतुर्थ्या एकस्य सम्बन्धिनः प्रकृत्या लाभेऽपि द्वितीयसम्बन्धिनः पृथक् पदोपात्तत्वेन वाक्यादेवतात्वलाभः। तद्धिते तु सम्बन्धिद्वयस्याप्येकपदोपस्थाप्यत्वाच्छ्रुत्या देवतात्वलाभः। वाक्याच्छ्रुतेः प्रबलतया चतुर्थपेक्षया तद्धितेन देवतावगतिः शीघ्रतरेति नात्र सिद्धान्तभङ्गापत्तिः॥

उक्तं च नागेशेनापि 'सम्बन्धित्वेन प्रदेयं मन्त्रश्च प्रत्ययार्थः। सम्बन्धित्वम् प्रत्ययार्थतावच्छेदकम् प्रकृत्यर्थस्य देवतात्वं वृत्तिस्वभावलभ्यम्। प्रकृतसूत्रे देवतापदोपादानेन देवतात्वेन देवतापि प्रकृत्यैवाभिधीयते। तथा च ऐन्दं दधि इत्यादौ इन्द्राभिन्नदेवतासम्बन्धितावच्छिन्ने प्रकृतिप्रत्ययसमुदायस्य शक्तिः। सम्बन्धित्वेन बोधेऽपि विशेषेण बोधार्थं दध्यादिपदप्रयोगः' इति।

अत्रेत्थं शङ्का न करणीया यत् ऐन्द्रं दधि इत्यत्र द्रव्यस्य पदान्तरात् लाभात् प्रत्यये पुनः शक्तिकल्पना मास्तु इति यतो हि पदान्तराश्रवणेऽपि तत्प्रतीतिर्भवति। किञ्च ऐन्द्रं दधि इति सामानाधिकरण्यार्थमपि तदपेक्षते।

इत्थमेव तदस्यां प्रहरणमिति क्रीडायां णः इत्यत्रापि प्रहरणविशिष्टा क्रीडा, प्रहरणक्रीडे, क्रीडामात्रं वार्थः। एवमन्यत्रापि द्रष्टव्यं भवति।

वस्तुतस्तु एतावद्यत् आलोचितं तद्दर्शनान्तरदिशा एव। वृत्तिमात्रे अतिरिक्तशक्तिः इति वैयाकरणानां राद्धान्तः। अयं विचारः समर्थसूत्रभाष्ये कृतः। अथवा अत्र आरोपितप्रकृतिप्रत्ययार्थमादायैतद् आलोचितमिति द्रष्टव्यम्। वस्तुगत्या तु विशिष्टशक्त्या एवात्र अर्थबोध इति सिद्धान्तसिद्धमिति शम्।

इदानीं प्रसङ्गात् देवतात्वं किमिति किञ्चिद्विचार्यते।

देवतात्वं च दिवेः ऐश्वर्यकर्मणः देवतेति 'देवात्तल्' इति सूत्रभाष्यात् मन्त्रकरणको यो हविस्त्यागः तज्जन्य-स्वर्गातिरिक्त-फलाश्रयत्वेन तदुद्देश्यत्वं मन्त्रस्तुत्यत्वं च। अत एव ऐन्द्रं हविः, ऐन्द्रो मन्त्र इत्यादि सिद्धम्। देवतानिष्ठं फलं च अस्येदं फलं भवतु इतीच्छारूपा प्रीतिरेव। 'कोऽदात् कामः कामायादात्' इत्यादिमन्त्रप्रयोज्यस्वामित्वभागिनि प्रतिग्रहीतरि अतिप्रसङ्गवारणाय मन्त्रकरणकेति हविस्त्यागविशेषणम्। स्वर्गाश्रयत्वेनोद्देश्ये यागकर्तरि अतिप्रसङ्गवारणाय स्वर्गातिरिक्तेति। 'न योषिद्भ्यः पृथक् दद्यात्' इत्यादितः श्राद्धे मृतपत्नीनां मृतानां हविस्सम्बन्धात् तद्वारणाय उद्देश्यत्वमिति। शूद्रकर्तृक श्राद्धादावपि नमस्कारो मन्त्रोऽस्त्येव 'अनुमतोऽस्य नमस्कारो मन्त्रः' इति गौतमस्मृतेः।

न च देवताया अपि यागाङ्गत्वम् आग्नेय इत्यादितद्धितादिभिर्बाध्यते। अनुष्ठेयम् उपकारकं हि अङ्गं भवति। न च देवता यागमध्ये स्वरूपेणानुष्ठातुं शक्या। नापि ऋत्विजाम् इव तासाम् उपकारकत्वम् इति वाच्यम् तद्वाचकशब्दोचारणस्यैव अनुष्ठेयत्वात्। वाचकशब्दद्वारैव तासाम् उपकारकत्वात्। शब्दश्चोपस्थित्वाद् अग्न्यादिरेव। तदुक्तं शबरस्वामिभिः 'शब्द एव हविषा सम्बध्यते। तत्सम्बन्धादर्थो देवता भविष्यति' इति। अन्यादिशब्दयुक्तयागेनेष्टं भावयेदिति विधिवाक्यार्थः। आवाहनमन्त्रैश्चानेकयागेषु सन्निधानं अयं यागो मदर्थ इति बुद्धिविशेष एवेति न शालादिभङ्गः। नाप्यनेकेषु सन्निधानानुपपत्तिः। यौगिवत् भूतानां तद्वश्यत्वेन इच्छया भूतान्यधिष्ठाय अनेकः सूक्ष्मतरैः शरीरै तत्र सन्निधाने बाधकाभावाच्च। अन्तर्धानशक्तियोगाच्च परैः अदर्शनम्। मन्त्रोक्तशब्दशरीरो भयावच्छिन्नेश्वरचैतन्यस्यैव देवतात्वे

तु नानुपपत्तिलेशोऽपि।

## परिशीलितग्रन्थसूची

१. *वैयाकरणभूषणसारः (प्रभादर्पणयुतः)*; बालकृष्णपञ्चोलिः (सम्पादकः); वाराणसी- चौखम्बासुरभारतीप्रकशनम्; १९८७।
२. *वैयाकरणभूषणसारः (तत्त्वदर्शिनीव्याख्यायुतः)*; कोम्पेल्ल सत्यनारायणशास्त्री (सम्पादकः); तिरुपतिः- श्रीवेङ्कटेश्वरवैदिकविश्वविद्यालयः; २०१६।
३. *वैयाकरणसिद्धान्तमञ्जूषा*; रामप्रसादत्रिपाठी (सम्पादकः); वाराणसी- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; १९७७।
४. *भूषणसारतत्वप्रकाशिका*; आचार्य कं.वे. रामकृष्णमाचार्यः; राष्ट्रियसंस्कृतविद्यापीठम्; तिरुपतिः, २०१०।
५. *शास्त्रदीपिका (मयूखमालिकायुक्तिस्नेहप्रपूरणीव्याख्याद्वययुता)*; धर्मदत्तझा (बच्चाझा)(सम्पादकः); मुंबई- निर्णयसागरप्रकाशनम्; १९९५।

✶ ✶ ✶

# अर्थवत्सूत्रे प्रत्ययान्तपर्युदासविमर्शः

**राजकुमार-मण्डलः** *

## उपोद्घातः

प्रातिपदिकसंज्ञाविधानाय आचार्येण पाणिनिना सूत्रद्वयमकारि- 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' (अष्टाध्यायी १.२.४५), 'कृत्तद्धितसमासाश्च' (अष्टाध्यायी १.२.४६) चेति। अत्र सूत्रे अर्थवत्, अधातुः, अप्रत्ययः, प्रातिपदिकमिति चत्वारि पदानि सन्ति। प्रातिपदिकमिति विधीयमानं संज्ञावाचकं पदम्। अधातुः, अप्रत्ययः इत्यत्र च पर्युदासेन धातुभिन्नः, प्रत्ययभिन्नः इत्यर्थो लभ्यते। अप्रत्ययेत्यस्य आवृत्त्या प्रत्ययान्तभिन्न इत्यपि अर्थो लभ्यते। तेन सूत्रार्थः भवति- धातुभिन्नः प्रत्ययभिन्नः प्रत्ययान्तभिन्नः अर्थवान् शब्दः प्रातिपदिकसंज्ञो भवति। अस्मिन् सूत्रे अप्रत्यय इति पदस्य आवृत्त्या प्रत्ययान्तपर्युदासः लभ्यते। अप्रत्ययपदस्य आवृत्या बहवः विकल्पपक्षाः अत्र सम्भवन्ति। अप्रत्यय इति सम्पूर्णपदस्य आवृत्तिरित्येकः पक्षः। अप्रत्ययघटकप्रत्ययपदस्य आवृत्तिरित्यपरः पक्षः। प्रत्यय इति स्वतन्त्रपदस्य आवृत्तिरित्यपरः पक्षः। एवं, त्रयोऽत्र पक्षाः सम्भवन्ति। सर्वेषु पक्षेष्वपि भेदीयप्रतियोगितावच्छेदकौ द्वौ धर्मौ सम्भवतः। एकत्र प्रत्ययान्तत्वम्, अपरत्र च प्रत्ययान्ततदादित्वम्। अनयोः प्रत्ययान्ततदादित्वस्य भेदीयप्रतियोगितावच्छेदकत्वेन स्वीकार एव भाष्यराद्धान्तः।

अस्मिन् शोधप्रबन्धे प्रत्ययान्ततदादिपर्युदासस्य प्रत्ययान्त-पर्युदासस्य च प्राप्तिप्रकार आदौ प्रतिपाद्यते। ततः प्रत्ययान्त-पर्युदासपक्षस्य समर्थिकाः युक्तयः प्रदर्श्यन्ते। प्रत्ययान्तपर्युदासपक्षे लक्ष्यासिद्धिरूपाव्याप्तिदोषप्रदर्शनेन प्रत्ययान्ततदादिपर्युदासपक्षस्य भाष्यराद्धान्तस्य उपस्थापनं क्रियते।

## प्रत्ययान्ततदादिपर्युदासप्राप्तिः

भगवता पाणिनिना अप्रत्यय इति पदोपादानेन प्रत्ययपर्युदास एव साक्षात्कृतो वर्तते। प्रत्ययान्ततदादिपर्युदासस्तु भगवता नैव कृतः। एवं, प्रत्ययान्ततदादिपर्युदासस्य प्राप्तिः कथं सेत्स्यतीति

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिकशोधसंस्थानस्य

संशयः। अत्र अप्रत्ययपदस्य आवृत्तौ सत्यां प्रत्ययान्ततदादिपर्युदासो लभ्यते। आवृत्तौ त्रयः पक्षाः- अप्रत्ययपदस्य आवृत्तिः, अप्रत्यय इति समस्तपदघटकस्य प्रत्ययपदस्य आवृत्तिः, प्रत्यय इति स्वतन्त्रपदस्य आवृत्तिश्चेति। आदौ अप्रत्यय इति समस्तपदस्य आवृत्तिरिति पक्षः। अप्रत्ययघटकप्रत्ययपदस्य आवृत्तिः क्रियते। अत्र सूत्रकारेण एकशेषेण निर्देशः कृतः, श्रोतुश्च आवृत्या बोधो जायते। अर्थात्, द्वन्द्वादौ श्रुयमाणस्य अपदार्थस्य श्रुयमाणे प्रत्ययपदार्थे आवृत्तिप्राप्तप्रत्ययपदार्थे चाऽन्वयो भवति। अत्र आवृत्तं प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं भवति। यत् प्रत्ययपदम् अणादिप्रत्ययमात्रं बोधयति, अणादिप्रत्ययातिरिक्तं न किमपि बोधयति, तद्भवति प्रत्ययमात्रवृत्तिविषयताप्रयोजकपदम्। प्रकृते, आवृत्तं प्रत्ययपदं पाणिनिसङ्केतसम्बन्धेन अणादिप्रत्ययमात्रं बोधयति, अणाद्यतिरिक्तं धात्वादिकं न बोधयति। एवम् आवृत्तं प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं वर्तत एव। ततः प्रत्ययमात्रवृत्ति-विषयताप्रयोजकपदघटितशास्त्रे तदादिरुपतिष्ठते इत्यर्थिकया 'प्रत्यय-ग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्'[१] इति परिभाषया तदादिरिति विशेष्यपदम् उपतिष्ठते। तत्र प्रत्ययमात्रवृत्ति-विषयताप्रयोजकपदं यद्विभक्त्यन्तं भवति, तदादेरुपस्थितिरपि तद्विभक्त्यन्ततया जायते। प्रकृते प्रत्ययमात्रवृत्तिविषयताप्रयोजक-प्रत्ययपदघटितं शास्त्रं हि अर्थवदित्यादिशास्त्रम्। अस्मिन् शास्त्रे प्रत्ययमात्रवृत्तिविषयताप्रयोजकप्रत्ययपदस्य प्रथमान्तत्वाद् तदादि-रिति प्रथमान्तस्य उपस्थितिर्भवति। तेन अर्थवत्, अधातुः, अप्रत्ययः, प्रत्ययः, तदादिरिति पदानि भवन्ति। उपस्थितः तदादिः विशेष्यपदं, प्रत्ययपदञ्च विशेषणपदम्। तत्र अभेदसम्बन्धावच्छिन्नप्रयोजकं पदम् आत्मान्तस्य बोधकं भवतीत्यर्थकेन 'येन विधिस्तदन्तस्य' (अष्टाध्यायी १.१.७२) इति सूत्रेण अभेदसम्बन्धावच्छिन्नप्रयोजकप्रत्ययपदं स्वान्तस्य बोधकं भवति। तेन प्रत्ययान्ततदादिरित्यर्थो लभ्यते। प्रत्ययान्ततदादेः प्रतियोगितासम्बन्धेन नञर्थे भेदेऽन्वये प्रत्ययान्त-तदादिप्रतियोगिकभेद इत्यर्थस्य प्राप्तिर्जायते। एवं, प्रत्ययान्त-तदादिपर्युदासो लभ्यते।

अप्रत्ययघटकप्रत्ययस्य आवृत्तौ दोषो भवति। अप्रत्यय इति

१ परिभाषेन्दुशेखरः, परिभाषासंख्या २३

समस्तपदम्। समासे च प्राचीनैः जहत्स्वार्थावृत्तिमात्रस्य अङ्गीकारात् समस्तपदघटकानाम् अर्थवत्त्वाऽभावः। प्रकृते अप्रत्यय इति समस्तपदघटकप्रत्ययशब्दस्य अर्थवत्त्वाऽभावात् नेदम् आवृत्तं प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं भवति। प्रत्ययपदस्य प्रत्ययमात्रवृत्ति-विषयताप्रयोजकत्वाऽभावे तदादेरनुपस्थितौ प्रत्ययान्ततदादिरित्यर्थः प्रत्ययपदलभ्यो न भवतीति संशयः।

अस्य संशयस्य निरासाय अप्रत्ययेति सम्पूर्णपदस्य आवृत्तिः क्रियते चेदपि दोषः तदवस्थ एव। यतो हि, अप्रत्ययपदस्य अर्थो हि प्रत्ययप्रतियोगिकभेदः। भेदस्य प्रतियोगितावच्छेदकेन सह विरोधात् कृत्स्नम् अप्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं नास्त्येव। अप्रत्ययघटकप्रत्ययपदञ्च अर्थवत् नास्ति। एवं, कृत्स्नस्य अप्रत्ययपदस्य आवृत्तावपि कृत्स्नस्य अप्रत्ययपदस्य प्रत्ययमात्रवृत्ति-विषयताप्रयोजकत्वाऽभावात्, अप्रत्ययघटकप्रत्ययपदस्य अर्थवत्त्वाऽभावात् प्रत्ययमात्रवृत्तिविषयताप्रयोजकत्वाऽभावाच्च तदादेरुपस्थितिः नैव सम्भवति। अप्रत्ययघटकप्रत्ययपदस्य कृत्स्नस्य अप्रत्ययपदस्य वाऽवृत्तौ तदादेरुपस्थित्यभावात् प्रत्ययान्ततदाद्यर्थः प्रत्ययपदबोध्यो न भवति।

**संशयनिरासः**

अर्थवत्सूत्रे अप्रत्यय इति समस्तपदं न, अपि तु अ इति पृथक्पदं, प्रत्ययेति पृथक्पदम्। एवञ्च, अर्थवत्, अधातुः, अ, प्रत्ययः, प्रातिपदिकम् इत्यर्थवत्सूत्रगतपदच्छेदः। स्वतन्त्रं प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं भवति। तेन तदादेरुपस्थितौ प्रत्ययान्ततदादिप्रतियोगिकभेद इत्यर्थस्य प्राप्तिः सेत्स्यति। अस्मिन् पक्षे अ इत्यस्य पृथक्पदत्वं स्वीकृतम्। तत्र अ इत्यस्य निषेधार्थकस्वतन्त्रपदत्वेन शास्त्रे स्वीकारोऽस्ति। अत्र वैद्यनाथपायगुण्डेमहोदयेन चिदस्थीमालाग्रन्थे अ इत्यस्य पृथक्पदत्वेन अङ्गीकारः कृतः। भगवता भर्तृहरिणा वाक्यपदीये प्रत्यपादि-

धात्वादीनां विशुद्धानां लौकिकार्थो न विद्यते।
कृत्तद्धितानामर्थश्च केवलानामलौकिकः॥

[वाक्यपदीयम् २.२१०]

वैद्यनाथपायगुण्डेमहोदयेन चिदस्थीमालायामस्याः कारिकाया उत्तरार्द्धस्य व्याख्या अकारि। केवलानां कृत्तद्धितानां लौकिकोऽर्थः

न विद्यत इत्येव वैद्यनाथकृतार्थतात्पर्यम्।[२] अस्मिन्नर्थे सति अलौकिक इत्यत्र असमर्थसमासस्य कल्पना करणीया भवति। यतो हि, प्रकृते नञर्थस्य भेदस्य विद्धातुवाच्यसत्ताक्रियायामन्वयः। लौकिकपदार्थेन सह नञर्थस्य भेदस्य अन्वयाऽभावात् अनयोः परस्परान्वयित्वरूपसामर्थ्याऽभावात् समासो न सेत्स्यति। तेन असमर्थसमासस्य कल्पना करणीया भवति। अत्र असमर्थसमासः पायगुण्डेमहोदयेन नाऽङ्गीकृतः। अपि तु भेदार्थकस्य अ इति पृथक्पदस्य अङ्गीकारेण अलौकिक इत्यस्य समस्तपदत्वमेव निराकृतम्। किञ्च, स्वरादिगणे निषेधार्थकः अशब्दः पठितः।[३] एवं निषेधार्थकस्य अशब्दस्य प्रमाणसिद्धत्वात् अर्थवत्सूत्रे अ इति पृथक्पदं, प्रत्यय इति पृथक्पदमिति पक्षो युक्त एव भवति।

अप्रत्यय इति समस्तपदघटकप्रत्ययपदस्य कृत्स्नस्य अप्रत्ययपदस्य आवृत्तावपि प्रत्ययान्ततदादिपर्युदासः सेत्स्यतीति युक्त्या निरूप्यते। समासे जहत्स्वार्थावृत्तिमात्रस्य अङ्गीकारेण समुदायार्थस्यैव अङ्गीकाराद् समासघटकानामर्थवत्त्वाऽभावे सति प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं न भवतीति दोष उपन्यस्तः। परन्तु, नव्यानां नये समासे अजहत्स्वार्थावृत्तेरपि अङ्गीकारोऽस्ति। तेन समासघटकानामपि अर्थवत्त्वात् अप्रत्ययघटकप्रत्ययपदस्य प्रत्ययमात्रवृत्तिविषयताप्रयोजकपदत्वात् तदादेरुपस्थितिः भवत्येव। नव्यनये यत्र अवयवार्थेन सह समुदायार्थस्य विरोधः तत्रैव जहत्स्वार्थावृत्तिः स्वीक्रियते। तदुक्तम्–

'जहत्स्वार्था तु तत्रैव यत्र रूढिर्विरोधिनी ॥'[४]

कृत्स्नस्य अप्रत्ययपदस्य आवृत्तावपि अप्रत्ययघटकप्रत्ययपदस्य अर्थवत्त्वात् प्रत्ययपदं प्रत्ययमात्रवृत्तिविषयताप्रयोजकं भवति। कृत्स्नस्य अप्रत्ययपदस्य आवृत्तावपि प्रत्ययान्ततदादेरुपस्थितिः सेत्स्यति। परन्तु, अप्रत्ययघटकप्रत्ययपदस्य कृत्स्नस्य अप्रत्ययपदस्य चाऽऽवृत्तेः समानफलकत्वं वर्तते। कृत्स्नस्य अप्रत्ययपदस्य आवृत्तौ

---

२ 'लौकिको नास्तीत्यर्थः। असूर्यमित्यादिसामान्यापेक्षः ज्ञापकादसमर्थसमास इति केचित्। वस्तुतस्तु नञर्थकोऽकारोऽत्र, तेन पदभेद एवेति बोध्यम्।' (लघुशब्देन्दुशेखरः, पृष्ठम् १४)

३ वैयाकरणसिद्धान्तकौमुदी, पृष्ठम् ४८६

४ परमलघुमञ्जुषा, पृष्ठम् ३०९

गौरवम् इति अप्रत्ययघटकप्रत्ययपदस्य आवृत्तिपक्ष एव श्रेयः।

**प्रत्ययान्तपर्युदासप्राप्तिः**

प्रत्ययान्ततदादिपर्युदासस्य प्राप्तौ प्रत्ययपदनिष्ठविशेषणता-निरूपितविशेष्यवाचकं पदं भवति उपस्थिततदादिपदम्। प्रत्ययान्तपर्युदासे केवलं विशेषणविशेष्यभावे व्यत्यासो भवति। अर्थवत्सूत्रे शब्दस्वरूपम् इति पदम् अध्याह्रियते। अध्याहृतं शब्दस्वरूपपदम् आवृत्तप्रत्ययपदनिष्ठप्रकारतानिरूपितविशेष्य-वाचकपदं भवति। ततः तेन विधिस्तदन्तस्य इति परिभाषया तदन्तविधौ आवृत्तप्रत्ययपदं प्रत्ययान्तस्य बोधकं भवति। प्रत्ययान्तपदार्थस्य नञर्थे भेदे प्रतियोगितासम्बन्धेन अन्वये प्रत्ययान्तप्रतियोगिकभेद इत्यर्थो लभ्यते। अस्मिन् पक्षे तदाद्युपस्थापिकायाः परिभाषायाः संञ्चारो न कर्तव्यो भवतीति लाघवम्। तदाद्युपस्थापकपरिभाषाऽप्रवृत्तिरूपं लाघवम् आश्रित्य प्रत्ययान्तपर्युदासपरोऽयं पक्षः सेत्स्यति।

**बीजम्**

भगवता पाणिनिना साक्षान्न कुत्रापि प्रत्ययान्ततदादिपर्युदासः प्रत्ययान्तपर्युदासो वा उल्लिखितः। तर्हि कृत्स्नस्य अप्रत्ययपदस्य, अप्रत्ययघटकप्रत्ययपदस्य स्वतन्त्रस्य प्रत्ययपदस्य वा आवृत्त्या प्रत्ययान्ततदादिपर्युदासस्य प्रत्ययान्तपर्युदासस्य वा कल्पने किमपि मानमस्ति वेति प्रश्नः।

कृत्तद्धितेत्यादिसूत्रे तद्धितग्रहणमेवाऽत्र मानम्। अर्थवत्सूत्रे प्रत्ययपदस्य आवृत्त्यभावे प्रत्ययपर्युदासमात्रं सेत्स्यति। तेन धातुभिन्नं प्रत्ययभिन्नम् अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञकं भवतीति अर्थवत्सूत्रस्यार्थः फलति। कृत्तद्धितेत्यादिसूत्रे अनुवृत्तमर्थवत्पदमाश्रित्य तद्धितपदे तदन्तविधिना तद्धितान्तस्य ग्रहणं भवति। उपगोः अपत्यमिति विग्रहे उपगु ङस् इत्यस्मात् 'तस्यापत्यम्' (अष्टाध्यायी ४.१.९२) इति सूत्रेण अणप्रत्यये 'सुपो धातुप्रातिपदिकयोः' (अष्टाध्यायी २.४.७१) इति सूत्रेण सुब्लुक् विधातव्यः। उपगु ङस् अण् इति समुदायः धातुभिन्नः प्रत्ययभिन्नः अर्थवान् च वर्तते। तस्मात् अर्थवत्सूत्रेणैव अस्य तद्धितान्तसमुदायस्य प्रातिपदिकसंज्ञासिद्धौ कृत्तद्धितसमासाश्च इति सूत्रे तद्धितग्रहणं व्यर्थं भवति। तद्धितग्रहणं व्यर्थीभूय अर्थवत्सूत्रे प्रत्ययान्ततदादिपर्युदासं

ज्ञापयति। अधुना धातुभिन्नं प्रत्ययभिन्नं प्रत्ययान्ततदादिभिन्नम् अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं भवतीति अर्थवत्सूत्रस्य अर्थः फलति। उपगु ङस् अण् इति समुदायः प्रत्ययान्ततदादिसमुदाय एव वर्तते, न तु प्रत्ययान्ततदादिसमुदायभिन्नः। तेन अर्थवत्सूत्रेण उपगु ङस् अण् इति समुदायस्य प्रातिपदिकसंज्ञा न सेत्स्यति। तस्मात् कृत्तद्धितसूत्रे तद्धितग्रहणं चरितार्थं भवति।

अधुना अत्र प्रश्नः, तद्धितग्रहणं किं प्रत्ययान्तपर्युदासे लिङ्गमुतः प्रत्ययान्ततदादिपर्युदासे लिङ्गम्। यतो हि, उपगु ङस् अण् इति समुदायः यथा प्रत्ययान्तः वर्तते, तथैव प्रत्ययान्ततदादिरपि वर्तते। प्रत्ययनिष्ठचरमावयवकतानिरूपकसमुदायः प्रत्ययान्तः, अर्थात्, यस्य समुदायस्य अन्तावयवः प्रत्ययः सः समुदायः प्रत्ययान्तः। एवम्, अर्थवत्सूत्रे प्रत्ययान्तपर्युदासस्य प्रत्ययान्ततदादिपर्युदासस्य वा अङ्गीकारः शक्यः। इदानीमत्र कः पक्षः श्रेयस्कर इति प्रश्नः।

## प्रत्ययान्तपर्युदासपक्षसमर्थनम्

### प्रथमा युक्तिः

तद्धितग्रहणं प्रत्ययान्ततदादिपर्युदासे लिङ्गञ्चेत् 'कृत्तद्धितसमासाश्च' (अष्टाध्यायी १.२.४६) इति सूत्रघटकसमासपदं नियमार्थं भवति। नियमस्वरूपं सिद्धान्तकौमुद्यां श्रीमता भट्टोजिदीक्षितेन प्रत्यपादि- 'यत्र संघाते पूर्वभागः पदं तस्य चेद्भवति तर्हि समासस्यैव'[५] इति। राज्ञः पुरुषः इति लौकिकविग्रहे राजन् ङस् पुरुष सु इति अलौकिकविग्रहवाक्यम्। अत्र 'सुपो धातुप्रातिपदिकयोः' इति सूत्रविहितसुब्लुकः प्रवृत्तये राजन् ङस् पुरुष सु इति समुदायस्य प्रातिपदिकसंज्ञा वक्तव्या। राजन् ङस् पुरुष सु इति समुदायः प्रत्ययान्ततदादिः नास्ति। तस्मात् प्रत्ययान्ततदादिभिन्नत्वात् राजन् ङस् पुरुष सु इति समुदायस्य अर्थवत्सूत्रेणैव प्रातिपदिकसंज्ञायाः सिद्धौ समासग्रहणं नियमार्थं भवति।

प्रत्ययान्ततदादित्वं नाम प्रत्ययविशिष्टत्वम्। वैशिष्ट्यञ्च स्वघटितत्वं, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयघटितत्वं, स्वेतराघटितत्वं, स्वनिष्ठविधेयतानिरूपितोद्देश्यताश्रयेतराघटितत्वम् इति सम्बन्धचतुष्टयेन।

---

५ वैयाकरणसिद्धान्तकौमुदी, पृष्ठम् १७७

राम सु इत्यत्र समन्वयः दर्श्यते। अत्र सुप्रत्ययः, सुप्रत्ययविशिष्टः राम सु इति समुदायः। स्वपदेन सुप्रत्ययः ग्राह्यः। सुप्रत्ययघटितत्वं राम सु इति समुदाये अस्ति। सुप्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यताश्रयः रामशब्दः, एतद्घटितत्वं राम सु इति समुदाये अस्ति। सुप्रत्ययेतरघटपटाद्यघटितत्वमपि राम सु इति समुदाये अस्ति। राजन् ङस् पुरुष सु इति समुदाये तृतीयचतुर्थसम्बन्धयोरभावात् नाऽयं समुदायः प्रत्ययान्ततदादि वर्तते। एवं, राजन् ङस् पुरुष सु इति समुदायस्य धातुभिन्नत्वात् प्रत्ययभिन्नत्वात् प्रत्ययान्ततदादिभिन्नत्वात् अर्थवच्छब्दस्वरूपत्वाच्च अर्थवत्सूत्रेणैव प्रातिपदिकसंज्ञा सिद्ध्यति। एवं सिद्धे सति आरभ्यमाणो विधिर्नियमाय भवतीति नियमेन कृत्तद्धितसूत्रे समासग्रहणं नियमाय भवति। एवं, प्रत्ययान्ततदादिपर्युदासपक्षे समासग्रहणं नियमार्थं भवति।

प्रत्ययान्तपर्युदासपक्षे तु समासग्रहणं विध्यर्थं भवति। राजन् ङस् पुरुष सु इति समुदायस्य चरमावयवः सु इति प्रत्ययो वर्तते। तेन अयं समुदायः प्रत्ययान्त एव, न तु प्रत्ययान्तभिन्नः। एवं, प्रत्ययान्तपर्युदासपक्षे राजन् ङस् पुरुष सु इति समुदायस्य प्रत्ययान्तत्वात् प्रत्ययान्तभिन्नत्वाऽभावात् अर्थवत्सूत्रेण प्रातिपदिसंज्ञा नैव सिद्धा भवति। तस्मात् समासस्य प्रातिपदिकसंज्ञार्थं कृत्तद्धितसूत्रे समासग्रहणं विध्यर्थं भवति। एवं, प्रत्ययान्ततदादिपर्युदासपक्षे समासग्रहणं नियमार्थं, प्रत्ययान्तपर्युदासपक्षे समासग्रहणं विध्यर्थं भवतीति विशेषः।

विधिनियमसम्भवे विधेरेव अङ्गीकारो भवति। तथाहि परिभाषा पठिता शेखरकृता- 'विधिनियमसम्भवे विधिरेव ज्यायान्'[६] इति। मीमांसादर्शने विधेः त्रैविध्यम् उच्यते– अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति। व्याकरणशास्त्रे तु परिसंख्याविधेरेव नियमविधित्वेन व्यवहारो वर्तते। परिसंख्याविधेः त्रयः दोषाः मीमांसादर्शने प्रतिपादिताः–

श्रुतार्थस्य परित्यागादश्रुतार्थकल्पनात्।
प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदूषणा॥ [अर्थसंग्रहः]

परिभाषेन्दुशेखरे नागेशाचार्येणापि प्रत्यपादि– 'नियमे ह्यश्रुताया अन्यनिवृत्तेः सामर्थ्यात्परिकल्पनमुक्तानुवाददोषश्चेति

६ परिभाषेन्दुशेखरः, परिभाषासंख्या १०९

लाघवाद्विधिरेवेति बोध्यम्।'[७] एवं, प्रकृते प्रत्ययान्ततदादिपर्युदासपक्षे समासग्रहणं नियमार्थं, प्रत्ययान्तपर्युदासपक्षे च समासग्रहणं विध्यर्थं भवति। तस्मात् विधित्वप्रयोजकः प्रत्ययान्तपर्युदास एव अङ्गीकार्यः।

**द्वितीया युक्तिः**

प्रत्ययान्ततदादिपर्युदासपक्षे कृत्तद्धितसूत्रघटकसमासग्रहणं नियमार्थं भवति। अर्थात्, कृत्तद्धितेत्यादिसूत्रघटकस्य वैयर्थम् आपद्यते। वैयर्थ्यम् इदं प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम् इति परिभाषायाम् आश्रीयमाणाम् एव आपद्यते। परिभाषाया अनाश्रयणे कृत्तद्धितसूत्रघटकसमासपदं व्यर्थं न भवति। पाणिनिसूत्राऽपेक्षया परिभाषाः गौणभूता एव भवन्ति। विध्युपकारायैव परिभाषाणां प्रवृत्तिर्जायते। एवं पारार्थ्यात् परिभाषाणामप्राधान्यं सुतरामेव अङ्गीकर्तव्यं भवति। एवं, तदाद्युपस्थापिका परिभाषा अप्रधानभूता, कृत्तद्धितेत्यादिसूत्रञ्च प्रधानम्। अप्रधानभूतां परिभाषां प्रवर्त्य प्रधानस्य कृत्तद्धित्यादिसूत्रस्य वैयर्थ्यकल्पनमयुक्तमेव भवति। 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः'[८] इति परिभाषाऽपि मतमिदं पोषयति।

**तृतीया युक्तिः**

प्रत्ययान्ततदादिपर्युदासपक्षेऽपि कृत्तद्धितेत्यादिसूत्रघटकं समास-पदं विध्यर्थम् एव भवति। राजन् ङस् पुरुष सु इति समुदायः प्रत्यया-न्ततदादिरेव वर्तते। तस्मात्, अर्थवत्सूत्रे प्रत्ययान्ततदादिपर्युदासा-ङ्गीकारेऽपि राजन् ङस् पुरुष सु इति समुदायस्य प्रत्ययान्ततदादित्वात् प्रत्ययान्ततदादिभिन्नत्वाऽभावात् अर्थवत्सूत्रेण प्रातिपदिकसंज्ञा नैव सिद्ध्यति। तस्मात्, अप्राप्तायाः प्रातिपदिकसंज्ञायाः विधानाय उत्तरसूत्रे समासग्रहणं विध्यर्थमेव भवति प्रत्ययान्ततदादिपर्युदासपक्षे।

अधुना वियार्यो विषयो हि राजन् ङस् पुरुष सु इति समुदायः कथं प्रत्ययान्ततदादिः वर्तते। पूर्वं प्रतिपादितं यत् राजन् ङस् पुरुष सु इत्यत्र तृतीयचतुर्थसम्बन्धयोरभावात् प्रत्ययविशिष्टत्वाभावात् प्रत्ययान्ततदादित्वं निषिद्धम्। परन्तु, सूक्ष्मतया विचार्यमाणे सति स्पष्टमेतद्यत् राजन् ङस् पुरुष सु इत्यत्र राजन् ङस् इति

---

७ परिभाषेन्दुशेखरः, परिभाषासंख्या १०९

८ परिभाषेन्दुशेखरः, परिभाषासंख्या १०६

एकः प्रत्ययान्ततदादिः, पुरुष सु इत्यपरः प्रत्ययान्ततदादिः। एवम्, अत्र द्वयोः प्रत्ययान्ततदाद्योः वर्तमानात् राजन् ङस् पुरुष सु इति प्रत्ययान्ततदादिसमुदायः। प्रत्ययान्ततदादिसमुदायः प्रत्ययान्ततदादिरेव भवति। यथा, लोके चणकसमुदायः चणक एव, धान्यराशिः धान्यमेव इति व्यवहाराणां साधुत्वं स्वीक्रियते, तथैव प्रत्ययान्ततदादिसमुदायः प्रत्ययान्ततदादिरेव भवति।

व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकप्रत्येकवृत्तिधर्मावच्छिन्न-प्रतियोगिताकः भेदः न स्वीक्रियते। एवं, चणकसमुदायो चणको न इति भेदः नाङ्गीक्रियते। राजन् ङस् पुरुष सु इति प्रत्ययान्ततदादिसमुदायः (द्वौ प्रत्ययान्ततदादी) वर्तते। एवञ्च प्रत्ययान्ततदादिसमुदाये प्रत्ययान्ततदादित्वं वर्तत एव। राजन् ङस् पुरुष सु इति समासस्य प्रत्ययान्ततदादित्वात् प्रत्ययान्ततदादिपर्युदासपक्षेऽपि उत्तरसूत्रे समासग्रहणं विध्यर्थमेव भवति। अधुना, प्रत्ययान्ततदादिपर्युदासे प्रत्ययान्तपर्युदासे च समासग्रहणं विध्यर्थमेव भवति। तथापि, समानफलकत्वे सति अधिकं गौरवदोषाय भवति। प्रत्ययान्ततदादिपर्युदासपक्षे तदाद्युपस्थापिका परिभाषा प्रवर्तनीया भवतीति गौरवम्। तस्मात् लाघवात् (तदाद्युपस्थापकपरिभाषाया अप्रवृत्तौ प्रक्रियालाघवम्) प्रत्ययान्तपर्युदास एव अङ्गीकर्तव्य इति प्रत्ययान्तपर्युदासाङ्गीकर्तॄणां युक्तयः।

## प्रत्ययान्ततदादिपर्युदासपक्षसमर्थनम्

प्रत्ययान्तपर्युदासस्य स्वीकारे अव्याप्तिदोषो वर्तते। 'येन विधिस्तदन्तस्य' (अष्टाध्यायी १.१.७२) इति सूत्रस्य भाष्ये भाष्यकृद्भिः परमगार्ग्यायणः इति प्रयोगः कृतः।[१] अर्थवत्सूत्रे प्रत्ययान्तपर्युदासस्य अङ्गीकारे परमगार्ग्यायणः इति भाष्यप्रयोगः न सेत्स्यतीति अव्याप्तिः। तत्र गर्गशब्दात् 'गर्गादिभ्यो यञ्' (अष्टाध्यायी ४.१.१०५) इति सूत्रेण यञ्प्रत्यये आदिवृद्धौ गार्ग्यः इति रूपम्। परमश्चासौ गार्ग्यः इति विग्रहे कर्मधारयसमासे परमगार्ग्यः इति रूपम्। परमगार्ग्यस्य युवापत्यमिति विग्रहे परमगार्ग्यघटकगार्ग्यशब्दात् 'यञिञोश्च' (अष्टाध्यायी ४.१.१०१) इति सूत्रेण फक्प्रत्यये फस्य आयनादेशे परमगार्ग्यायण इति जाते प्रातिपदिककार्ये परमगार्ग्यायणः इति रूपं सेत्स्यति। 'यञिञोश्च'

[१] महाभाष्यम् नवमाह्निकम्, पृष्ठम् १६७१

(अष्टाध्यायी २.४.६४) इति सूत्रे तदादेरुपस्थितौ यञन्ततदादेः अञन्ततदादेश्च फक्प्रत्ययः भवतीति सूत्रार्थः। प्रकृते यञ्प्रत्ययः गर्ग ङस् इत्यस्माद्विहितः। तस्मात्, यञन्ततदादिरत्र गार्ग्य इत्येव, न तु परमगार्ग्य इति। परमगार्ग्यघटकगार्ग्यशब्दस्य यञन्ततदादित्वात् फक्प्रत्ययो विधीयते। तेन परमगार्ग्य ङस् यञ् इति स्थितिः। अत्र सुपो धातुप्रातिपदिकयोः इति सूत्रेण ङसः लुक्प्रवृत्तये परमगार्ग्य ङस् यञ् इति समुदायस्य प्रातिपदिकसंज्ञा विधातव्या। अर्थवत्सूत्रे प्रत्ययान्तपर्युदासस्य अङ्गीकारे सति परमगार्ग्य ङस् यञ् इति समुदायस्य प्रातिपदिकसंज्ञा न सेत्स्यति। यतो हि, अस्य समुदायस्य अन्तावयवः यञ् इति प्रत्ययः, तस्मात्समुदायोऽयं प्रत्ययान्त एव वर्तते, न तु प्रत्ययान्तभिन्नः। प्रत्ययान्तपर्युदासपक्षे अर्थवत्सूत्रेण प्रत्ययान्तभिन्नस्यैव प्रातिपदिकत्वं विधीयते। परमगार्ग्य ङस् यञ् इति समुदायस्य प्रत्ययान्तत्वात्, प्रत्ययान्तभिन्नत्वाऽभावात् नाऽर्थवत्सूत्रेण प्रातिपदिकसंज्ञा सेत्स्यतीति अव्याप्तिः।

प्रत्ययान्ततदादिपर्युदासे अङ्गीकृते नेयम् अव्याप्तिर्भवति। परमगार्ग्य ङस् यञ् इति समुदायः प्रत्ययान्ततदादिः न वर्तते। अत्र यञ्प्रत्ययस्य प्रकृतिर्हि गार्ग्य ङस् इति। तस्मात् प्रत्ययान्ततदादिरत्र गार्ग्य ङस् यञ् इति समुदायः। परमगार्ग्य ङस् इत्यस्मात् यञोऽविधीयमानत्वात् नाऽयं समुदायः प्रत्ययान्ततदादिः। अर्थवत्सूत्रे प्रत्ययान्ततदादिपर्युदासस्य अङ्गीकारे परमगार्ग्य ङस् यञ् इति समुदायस्य प्रत्ययान्ततदादिभिन्नत्वात् सुतरामेव प्रातिपदिकसंज्ञा सेत्स्यति।

## उपसंहारः

अस्मिन् शोधप्रबन्धे भाष्यराद्धान्तस्य प्रत्ययान्ततदादिपर्युदासस्य उपस्थापनं कृतम्। तत्र कृत्तद्धितेत्यादिसूत्रघटकतद्धितपदं प्रत्ययान्त-तदादिपर्युदासं प्रत्ययान्तपर्युदासं वा ज्ञापयतीति संशयः। अत्र प्रत्ययान्ततदादि-पर्युदासस्य प्रत्ययान्तपर्युदासस्य वा प्राप्तये बहवः पक्षाः सम्भवन्ति। कृत्स्नस्य अप्रत्ययपदस्य अप्रत्ययघटकप्रत्ययपदस्य स्वतन्त्रस्य प्रत्ययपदस्य वा आवृत्तौ प्रत्ययान्ततदादिपर्युदासस्य लाभो भवति। अत्र त्रिष्वपि पक्षेषु अप्रत्ययघटकप्रत्ययपदस्य आवृत्तिपक्षः सर्वापेक्षया युक्तो भाति। ततः तदाद्युपस्थापकपरिभाषया तदादि-विशेष्यकतदन्तविधौ प्रत्ययान्ततदादिपर्युदासो लभ्यते। तदाद्युप-

स्थापकपरिभाषायाः प्रवृत्तिम् अकारयित्वा अध्याहृतशब्दस्वरूप-विशेष्यकतदन्तविधौ प्रत्ययान्तपर्युदासो लभ्यते। प्रत्ययान्तपर्युदासे सति तिस्रो युक्तयः प्रदर्शिताः। परन्तु, प्रयोगाऽसिद्ध्यात्मकाव्याप्तिदोष-सद्भावात् प्रत्ययान्तपर्युदासो नैव अङ्गीकृतः। तत्र प्रत्ययान्त-तदादिपर्युदासाङ्गीकर्तॄणां प्रत्ययान्तपर्युदासाङ्गीकर्तॄणां वा प्रयोगस्तु कर्तव्यो भवति। प्रकृते प्रत्ययान्तपर्युदासपक्षे परमगार्ग्यायण इति भाष्यकृत्प्रयोगस्य सिद्धिर्नैव सेत्स्यति। तस्मात् प्रत्ययान्ततदादिपर्युदास एव तद्धितपदज्ञाप्य इति राद्धान्तसमीक्षणं शोधप्रबन्धेऽस्मिन् प्रस्तुतम्।

## परिशीलितग्रन्थसूची

१. *वैयाकरणसिद्धान्तकौमुदी* (बालमनोरमा-तत्वबोधिनीसहिता); भट्टोजिदीक्षितः; गिरिधरशर्मा परमेश्वरानन्दशर्मा च (सम्पादकौ); वाराणसी- मोतीलाल बनारसीदास; २०१४।

२. *प्रौढमनोरमा*; भट्टोजिदीक्षितः; रमाकान्तपाण्डेयः (सम्पादकः); वाराणसी- चौखम्बा विद्याभवनम्; २०१२।

३. *परिभाषेन्दुशेखरः* (सुबोधिनी-हिन्दीव्याख्योपेतः); नागेशः; विश्वनाथमिश्रः (सम्पादकः); वाराणसी- चौखम्बा सुरभारती प्रकाशन; २०१६।

४. *लघुशब्देन्दुशेखरः* (षट्टीकोपेतः); नागेशः; बालशास्त्री (सम्पादकः); वाराणसी- चौखम्बा सुरभारती प्रकाशन; २०१६।

५. *परमलघुमञ्जूषा* (भावप्रकाशिका-बालबोधिनी-सहिता); नागेशः; जयशङ्करलालत्रिपाठी (सम्पादकः); वाराणसी- चौखम्बा कृष्णदास अकादमी; २०११।

६. *महाभाष्यम्* (भावबोधिनी); पतञ्जलिः; जयशङ्करलालत्रिपाठी (सम्पादकः); वाराणसी- चौखम्बा कृष्णदास अकादमी; २०१७।

७. *अर्थसंग्रहः* (अर्थालोकोपेतः); लौगाक्षिभास्करः; पट्टाभिरामशास्त्री (सम्पादकः); वाराणसी- चोखम्बा ओरियन्टालिया; २०१७।

✶ ✶ ✶

# रघुवंशमहाकाव्यस्य तृतीयचतुर्थसर्गयोः मत्वर्थविमर्शः

**शान्तनुनायेकः** *

## १. भूमिका

महाकाव्यानि पञ्चसङ्ख्यकानीति रघुवंशं कुमारसम्भवं किरातार्जुनीयं शिशुपालबधं नैषधीयचरितम् इति सर्वैः विदितानि। रघुवंश-कुमारसम्भवे कालिदासविरचिते, किरातार्जुनीयं भारविणारच्यत, शिशुपालबधं माघकृतं, नैषधीयचरितञ्च श्रीहर्षप्रणीतम्। पञ्चस्वेतेषु महाकाव्येष्वन्यतमं भवति कालिदासविरचितं रघुवंशमहाकाव्यम्। न केवलं महाकाव्यम्, तेन नाटकादीन्यपि विरचितानि। कालिदासोऽभिज्ञानशाकुन्तल-विक्रमोर्वशीय-मालविकाग्निमित्राख्यानि त्रीणि नाटकानि व्यरचयन्त। तेन द्वे खण्डकाव्ये व्यरच्येताम्। ते च मेघदूत-ऋतुसंहाराख्ये। कालिदासस्य देशः उज्जयिनी, कालश्च ईसवीयपूर्वद्वितीयशतकात् ईसवीयसप्तमशतकमिति।

कालिदासस्य आभुवनविजयकृतिषु श्रेष्ठतमं भवति रघुवंशमहाकाव्यम्। अत्र सरलभाषया मनोज्ञवर्णनेन च रघुवंशः स्फुटीकृतः महाकविना। महाकाव्येऽस्मिन् नवदश सर्गाः परिकल्पिताः। अत्र च प्राधान्येन उपमालङ्कारः दरीदृश्यते। कालिदासोऽस्य महाकाव्यस्य बहुषु श्लोकेषु मत्वर्थयुक्तानां पदानां प्रयोगमकार्षीत्। मतोः अर्थाः इति मत्वर्थाः। के तावत् मत्वर्थाः इति प्रश्ने पाणिनेः सूत्रमेव उत्तरत्वेनोपस्थाप्यते। सूत्रं च 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति। अनेन सूत्रेण मतुप्प्रत्ययस्य विधानमकरोत् पाणिनिः। मतुप्प्रत्ययश्च तेन तदस्यास्ति इति तदस्मिन्नस्ति इति वार्थे विधीयते। अतः मतुपोऽर्थः तदस्यास्ति तदस्मिन् वा अस्ति इति। मतोरर्थाः इत्यत्र मतुपदेन मतुप्प्रत्ययः गृह्यते। तेन मतुप्प्रत्ययस्य योऽर्थः स एव मतोरप्यर्थः। न केवलं मतुप् एतयोरर्थयोः विधीयते अपि तु अन्ये अपि प्रत्ययाः विधीयन्ते।

---

* संशोधकः, संस्कृतदर्शनविभागे, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य

अतः मत्वर्थ इत्यत्र मतुपदेन तेऽपि प्रत्ययाः गृह्यन्ते। एतौ तु मतुपः सामान्यार्थौ। विशेषतस्तु मतुपः सप्त अर्थाः, ते च वार्तिककारेण कात्यायनेन स्वीये श्लोकवार्तिके प्रोक्ताः। वार्तिकञ्च-

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः॥[1] इति।

एतेन भूमा, निन्दा, प्रशंसा, नित्ययोगः, अतिशायनम्, संसर्गः अस्तिविवक्षा च मतुपोऽर्था इति सिद्धम्। एतेष्वर्थेष्वेव कालिदासेन स्वीये रघुवंशमहाकाव्ये मतुबादिप्रत्ययाः प्रयुक्ताः, उत अन्येष्वपि अर्थेषु इति सन्देहो जायते। सन्देहवारणाय रघवंशमहाकाव्यस्थे तृतीयसर्गे चतुर्थसर्गे च विराजमानानां मत्वर्थानां विचारः क्रियते मया। अत एव शोधप्रबन्धस्यास्य नाम रघुवंशमहाकाव्यस्य तृतीयचतुर्थसर्गयोः मत्वर्थविमर्शः इति प्रदत्तम्।

रघूणां वंशो यस्मिन् तत् रघुवंशम्, अथवा रघूणां वंशो रघुवंशः तम् अधिकृत्य कृतं काव्यं रघुवंशमिति। रघुवंशञ्च तत् महाकाव्यञ्च इति रघुवंशमहाकाव्यम्, तस्य रघुवंशमहाकाव्यस्य। तृतीयश्च चतुर्थश्च इति तृतीयचतुर्थौ, तृतीयचतुर्थौ च तौ सर्गौ इति तृतीयचतुर्थसर्गौ, तयोः तृतीयचतुर्थसर्गयोरिति। मतोरर्थाः मत्वर्थाः, तेषां मत्वर्थानां विमर्श इति मत्वर्थविमर्शः इत्यस्य शीर्षकस्य विग्रहः।

## २. तृतीयसर्गे मत्वर्थविमर्शः

रघुराज्याभिषेकाख्ये तृतीयसर्गे कालिदासेन सप्ततिः श्लोका उक्ताः। अस्मात् सर्गात् पञ्चषु मत्वर्थीयशब्देषु चत्वारः मत्वर्थीयशब्दाः व्याख्यायन्ते।

### २.१. स्पृहावती[2]

तृतीयसर्गस्थे पञ्चमे श्लोके स्पृहावतीति मत्वर्थीयं पदं प्रयुक्तं कालिदासेन। स्पृहास्या अस्तीति स्पृहावती। स्पृहेति शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति सूत्रेण मतुप्प्रत्ययः, मतुपो मकारस्य वकारादेशश्च 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' (अष्टाध्यायी ८.२.९) इति सूत्रेण जातः। ततस्त्रीत्वविवक्षायां मतुप्प्रत्ययस्योगित्त्वाद् 'उगितश्च' (अष्टाध्यायी ४.१.६) इति सूत्रेण ङीप्प्रत्यये प्रथमैकवचने स्पृहावतीति रूपं

---

[1] वैयाकरणसिद्धान्तकौमुदी, वार्तिकम् ३१८३

[2] न मे प्रिया शंसति...प्रियासखीरुत्तरकोसलेश्वरः॥ (रघुवंशम् ३.५)

सिद्ध्यति। स्पृहावतीति शब्दो मागधीति पदस्य विशेषणम्। मागधीपदेन च दिलीपपत्नी सुदक्षिणा बोध्यते। स्पृहेत्यस्यार्थ इच्छा। अतोऽतिशयेन यस्या इच्छा भवति सैव स्पृहावतीति कथ्यते। अतोऽत्र मतुपोऽर्थेष्वतिशयनरूपार्थो विद्यते।

## २.२. तपस्विना [३]

तपोऽस्यास्तीति तपस्वी, तेनेति विग्रहे तपस्विनेति रूपम्। एष मत्वर्थीयश्शब्दः तृतीयसर्गस्य अष्टादशतमे श्लोके विद्यते। इदं च विन्प्रत्ययान्तं रूपम्। 'तपःसहस्राभ्यां विनिनी' (अष्टाध्यायी ५.२.१०२) इति सूत्रेण च तपस् इति शब्दाद् विन्प्रत्ययः। अत्र तपसोऽसन्तत्व अपि 'अस्मायामेधास्रजो विनिः' (अष्टाध्यायी ५.२.१२१) इति सूत्रेण विनिप्रत्ययो न भवति, 'तपःसहस्राभ्यां विनिनी' (अष्टाध्यायी ५.२.१०२) इति सूत्रे तपश्शब्दस्य साक्षात् प्रयुक्तत्वाद्। तपस्विनेति पदं पुरोधसा इति पदस्य विशेषणभूतम्। पुरोधसा इति शब्देन वशिष्ठो बोध्यते। तपःकार्यं महत्कार्यम्। अतस्तत् कार्यं यः करोति स तपस्वी प्रशंसार्हः। स च तपस्व्यत्र महान् वशिष्ठः। अतो विन्प्रत्ययस्यात्र प्रशंसार्थत्वं स्याद् एव। एतेनास्य मत्वर्थेष्वन्तर्भावोऽस्तीति सिद्ध्यत्येव।

## २.३. अंसलः [४]

अंसौ स्तोऽस्येति विग्रह अंसल इति लच्प्रत्ययान्तं रूपम्। अत इदं मत्वर्थीयम्। इदं च पदं चतुस्त्रिंशत्तमे श्लोके विराजते। अंसशब्दाद् 'वत्सांसाभ्यां कामबले' (अष्टाध्यायी ५.२.९८) इति सूत्रेण बलार्थे लच्प्रत्ययो वर्तते। अस्यार्थो बलवान् इति। अंसलः इति पदं च रघुः इति पदस्य विशेषणम्। अतिशयेन बलं यस्य जनस्यास्ति स जन एव बलवान् इति कथ्यते। रघुरतिशयेन बलवान् आसीद् इति बोधयितुम् अत्र अंसशब्दाद् लच्प्रत्ययः प्रयुक्तः। अतः अंसल इत्यत्रातिशयनार्थे लच्प्रत्ययोऽभवत्।

## २.४. कृती [५]

तृतीयसर्गस्य एकपञ्चाशत्तमे श्लोके कृतीति मत्वर्थीयं पदं

---

[३] स जातकर्मण्यखिले तपस्विना...प्रयुक्तसंस्कार इवाधिकं बभौ॥ (रघुवंशम् ३.१८)

[४] युवा युगव्यायतवाहुरंसलः...रघुस्तथापि नीचैर्विनयादृश्यत॥ (रघुवंशम् ३.३४)

[५] तपः प्रहस्यापभयः पुरन्दरम्...न खल्वनिर्जित्य रघुं कृती भवान्॥ (रघुवंशम् ३.५१)

प्रयुक्तं कालिदासेन। दिलीपपुत्रो रघुः कृतीति पदेन देवेन्द्रम् उक्तवान्। मल्लिनाथेन कृतमनेन इति विग्रहे कृतीति पदं भवतीत्युक्तम्। तेन 'इष्टादिभ्यश्च' (अष्टाध्यायी ५.२.८८) इति सूत्रेण कृतशब्दाद् इनिप्रत्ययो भवतीत्यप्युक्तम्। एतच्च सूत्रं भट्टोजिदीक्षितेन वैयाकरणसिद्धान्तकौमुद्यां मत्वर्थप्रकरणम् उल्लिखितम्। शब्दकल्पद्रुमे त्वस्य शब्दस्य तात्पर्यवाक्यं भिन्नमेव वर्तते। 'कृतं कर्म प्रशस्तमस्यास्ति'[६] इति तत्रोक्तम्। तत्र चास्य श्लोकस्योद्धरणमपि कृतम्। अत्र शब्दकल्पद्रुमकारः 'अत इनिठनौ' (अष्टाध्यायी ५.२.११५) इति सूत्रेण इनिप्रत्ययान्तं कृतीति पदम् उक्तवान्। उभयथापि कृतीति रूपं भवितुमर्हति। शब्दकल्पद्रुमस्य विग्रहवाक्यं दृष्ट्वा ज्ञायते यद् अत्र प्रशंसार्थ इनिप्रत्ययोऽभवत्। स चार्थो मत्वर्थेष्वन्तर्भवति।

## ३. चतुर्थसर्गे मत्वर्थविमर्शः

रघुवंशमहाकाव्यस्य चतुर्थसर्गस्य नाम भवति रघुदिग्विजय इति। अस्मिन् सर्गे अष्टाशीतिः श्लोकास्सन्ति। सर्गादस्मात् नवसु मत्वर्थीयशब्देषु षट् मत्वर्थीयशब्दाः व्याख्यायन्ते।

### ३.१. नभस्वान्[७]

नभस्वानिति मतुप्प्रत्ययान्तं रूपम्। शब्दकल्पद्रुमेऽस्य तात्पर्यवाक्यमुक्तम् 'आकाशाद्वायुरिति श्रुतेर्नभ उत्पत्तिकारण-त्वेनास्त्यस्य'[८] इति। विग्रहश्च नभोऽस्त्यस्य, स इति। नभश्शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति सूत्रेण मतुप्प्रत्ययः, मतुपो मकारस्य वकारादेशश्च 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' (अष्टाध्यायी ८.२.९) इति सूत्रेणाभूत्। नभस्वान् इति शब्देन वायुर्बोध्यते। स च वायुर्दक्षिणदिग्भवः। अतोऽयं वायुः नात्युष्णः, नापि शीतलः। तादृशो वायुरिव वर्तते रघुः। अत्र नभो द्रव्यं वायुरपि द्रव्यम्, द्वयोर्द्रव्ययोस्संयोगो विद्यते, संयोगश्च सम्बन्धः, सम्बन्धश्च संसर्गः। तस्मात्संसर्गार्थेऽत्र मतुप्।

---

६ शब्दकल्पद्रुमः पृष्ठम् १७६

७ स हि सर्वस्य लोकस्य...नभस्वानिव दक्षिणः॥ (रघुवंशम् ४.८)

८ शब्दकल्पद्रुमः पृष्ठम् ८२७

## ३.२. ककुद्मन्तः [९]

चतुर्थसर्गस्य द्वाविंशतितमश्लोकस्य प्रथमे पादे वर्तते ककुद्मन्त इति शब्दः। अयं च शब्दो मत्वर्थीयः। ककुद् एषाम् अस्ति, ते इति चास्य विग्रहः। ककुद् इति शब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति सूत्रेण मतुप्प्रत्यये प्रथमाबहुवचने ककुद्मन्त इति रूपम्। 'ककुच्च नाम कं सुखं कावयति गृहस्थस्यौन्नत्यं प्रापयति'[१०] इति शब्दकल्पद्रुमे। तद्वान् च वृषो भवति। अतः ककुद्मन्त इत्यस्यार्थो वृषा इति। ककुत् सुखलक्षणं, तदस्यास्तीति कारणात् स प्रशंसार्हः। अतो मतुपः प्रशंसार्थत्वम्। उत वा ककुद् वृषे संयोगसम्बन्धेन तिष्ठत्यतोऽत्र संसर्गरूपमत्वर्थो विद्यत इत्यपि वक्तुं शक्यते।

## ३.३. उदन्वता [११]

द्विपञ्चाशत्तमश्लोकस्य द्वितीयपादस्य अन्तिमश्शब्द उदन्वतेति। मल्लिनाथेनोक्तम् 'उदकान्यस्य सन्तीत्युदन्वानुदधिः'[१२] इति। एतेनैतत् पदं मत्वर्थीयम् इति सिद्ध्यति। उदकशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति सूत्रेण मतुप्प्रत्ययः, 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' (अष्टाध्यायी ८.२.९) सूत्रेण मतुपो मकारस्य वकारादेशः। मतौ परे सति पूर्वम् उदकशब्दस्योदन्भावो निपात्यते 'उदन्वानुदधौ च' (अष्टाध्यायी ८.२.१३) इति सूत्रेण। अत्र हि भूमार्थे मतुप्प्रत्ययः प्रयुक्तः। उदन्वान् इत्यस्यार्थस्समुद्रः। तत्र हि प्रभूतमुदकं विद्यते। अतो भूमार्थरूपमत्वर्थोऽत्र विराजते। अस्य शब्दस्य पाठोऽस्यैव सर्गस्याष्टपञ्चाशत्तमे श्लोके पञ्चमसर्गादिषु च कृतः।

## ३.४. संयमी [१३]

अत्र संयमीति शब्दो मत्वर्थीयः। मल्लिनाथेनास्यार्थ उक्तो योगीति। संयमोऽस्यास्तीति च विग्रहः। संयमशब्दाद् 'अत

---

९ मदोदग्राः ककुद्मन्तः...महोक्षास्तस्य विक्रमम्॥ (रघुवंशम् ४.२२)

१० शब्दकल्पद्रुमः पृष्ठम् २

११ असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता...स्रस्तांशुकमलङ्घयत्॥ (रघुवंशम् ४.५२)

१२ रघुवंशम् पृष्ठम् ८८

१३ पारसीकांस्ततो जेतु...तत्त्वज्ञानेन संयमी॥ (रघुवंशम् ४.६०)

इनिठनौ' (अष्टाध्यायी ५.२.११५) इति सूत्रेण इनिप्रत्यये सति रूपं सिद्ध्यति। योगशास्त्रे अष्टस्वङ्गेष्वन्तर्भवति यमः। तत्रैकं सूत्रं वर्तते 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः'[१४] इति। एते सम्यग्रूपेण यस्य सन्ति स एव संयमी भवति। अतोऽत्र संयमिनः प्रशंसा क्रियत इति ज्ञायते। तेन चास्य मतुपोऽर्थेषु प्रशंसारूपोऽर्थो विद्यते।

### ३.५. हिमवतः [१५]

हिमम् अस्यास्ति, तस्येति विग्रहे हिमवत इति रूपम्। तच्च पदं मत्वर्थीयम्। हिमशब्दात् 'तदस्यास्त्यस्मिन्निति मतुप्' (अष्टाध्यायी ५.२.९४) इति सूत्रेण मतुप्प्रत्यये मतुपो मकारस्य वकारे, पुंलिङ्गे षष्ठ्येकवचने हिमवत इति रूपं सिद्ध्यति। यद्यपि बहु हिमम् अस्यास्तीत्यर्थेऽत्र मतुबभवत्, तेन भूम्न्यर्थे मतुबित्यवगम्यते। तथाप्यत्र प्रसङ्गेन ज्ञायते यद् द्वयोः नृपहिमवतोः पराक्रमस्य प्रशंसा क्रियते। अतः प्रशंसार्थे मतुप्प्रत्यय इत्यपि वक्तुं शक्यते।

### ३.६ कालागुरुद्रुमैः [१६]

कालागुरुद्रुमैः इति शब्दमध्ये पठितः द्रुमशब्दः मत्वर्थीयः। न गुरव इत्यगुरवः, अगुरवश्च ते द्रुमाः अगुरुद्रुमाः कालाश्च ते अगुरुद्रुमाः, तैरिति कालागुरुद्रुमैः। द्रुर्विद्यत एषाम्, ते इति द्रुमाः। अत्र मः प्रत्ययो विद्यते। स च प्रत्ययः 'द्युद्रुभ्यां मः' (अष्टाध्यायी ५.२.१०८) इति सूत्रेण विहितः। द्रवति ऊर्द्धं गच्छतीति द्रुः, अस्य वृक्ष इत्यर्थः, तथापि समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्तन्त इति न्यायाद् द्रुरित्यस्य शाखेत्यर्थः। तेन शाखा विद्यत एषामिति द्रुमशब्दस्यापि वृक्ष इत्यर्थः। अत एव मल्लिनाथः कालागुरुद्रुमैरिति शब्दस्य कृष्णागुरुवृक्षैरित्यर्थमवोचत्। शाखा हि द्रुमस्यावयवभूता, द्रुमश्चावयवी। अवयवावयविनोस्समवायसम्बन्धात् संसर्गार्थे द्रुशब्दाद् मप्रत्ययस्य प्रयोगं कृतवान् कालिदासः। द्रुमशब्दस्य पाठो द्वितीयसर्गादिषु कालिदासेन रघुवंशे भूयः क्रियते।

---

१४ पातञ्जलयोगः २.३०

१५ परस्परेण विज्ञातः...हिमवतः सारो राज्ञः सारो हिमाद्रिणा॥ (रघुवंशम् ४.७९)

१६ चकम्पे तीर्णलौहित्ये...सह कालागुरुद्रुमैः॥ (रघुवंशम् ४.८१)

# ४. उपसंहारः

तृतीयसर्गात् चत्वारः, चतुर्थसर्गाच्च षट् शब्दाः एवम् आहत्य दश शब्दाः व्याख्याताः अस्मिन् शोधप्रबन्धे। कालिदासेन एतयोरध्याययोः सप्तस्वर्थेषु भूमप्रशंसातिशायनसंसर्गेषु चतुर्ष्वर्थेषु मतुबादिप्रत्ययानां प्रयोगः कृतः। बहोर्भावो भूमा, इमनिच्प्रत्ययान्तमिदं रूपम्। प्रशंसनं प्रशंसा, अप्रत्ययात् टापि प्रशंसा इति रूपं भवति। आधिक्यम् अतिशायनम्, ल्युट्प्रत्ययान्तम् इदं रूपम्। सम्बन्धविशेषः संसर्गः, घञ्प्रत्ययान्तमिदं रूपम्। तत्त्वबोधिनीकारेण मतुपः सप्तस्वर्थेषु अस्तिविवक्षारूपोऽर्थो न स्वीकृतः। तस्य मते तु षडेव मत्वर्थाः। वस्तुतस्तु सप्तैवार्थाः स्वीकरणीयाः। एतत्तु शब्दरत्ने प्रतिपादितम्। सूत्रे अस्तिपदोपादानेऽपि सत्तायाः ग्रहणं भविष्यति न पदार्थः सत्तां व्यभिचरति इति वचनात्। तथापि तत्र अस्तिपदं प्रयुक्तं पाणिनिना, तेनैव ज्ञाप्यते यत् अप्रथमान्तात् अस्तिपदात् मतुप्प्रत्ययो भवतीति शम्।

## परिशीलितग्रन्थसूची

१. *अष्टाध्यायीसूत्रपाठः* (दीक्षितपुष्पाकृतप्रकरणनिर्देशसमन्वितः); पाणिनिः; पुष्पादीक्षितः; नवदेहली- संस्कृतभारती; २०१०।

२. *पातञ्जलयोगसूत्राणि* (वाचस्पतिमिश्रविरचितटीकासंवलितव्यासभाष्यसमेतानि तथा भोजदेवविरचितराजमार्तण्डाभिधवृत्तिसमेतानि); पतञ्जलिः; काशीनाथशास्त्री आगाशे(संशोधकः); हरिनारायणआपटे(प्रकाशकः); आनन्दाश्रमसंस्कृतग्रन्थावलिः; १९०४।

३. *प्रौढमनोरमा* (अव्ययीभावान्तो भागः); भट्टोजिदीक्षितः; वाराणसी- चौखम्भा संस्कृत संस्थान; २०५९(वि.सं.)।

४. *रघुवंशः* (महामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितया संजीविन्या समेतः); कालिदासः; मोरेश्वर-रामचन्द्र-काळे; मुम्बई- मुम्बईवैभव; १८४४(शका.)।

५. *रघुवंशम्* (मल्लिनाथकृत-सञ्जीविनी-व्याख्या-समलङ्कृतम् तथैव च चन्द्रकला-हिन्दीव्याख्योपेतम्); कालिदासः; कृष्णमणि-त्रिपाठी; वाराणसी- चौखम्बा सुरभारती प्रकाशन; २०१४।

६. *रघुवंशमहाकाव्य* (मुरादाबादनिवासि पण्डित ज्वालाप्रसादमिश्र कृत अन्वय-वाच्यपरिवर्तन-सरलार्थ-और, भावार्थ भाषाटीका समेत); कालिदास; ज्वालाप्रसाद मिश्र; बंबई- खेमराज श्रीकृष्णदासन; १९६४।

७. *रघुवंशमहाकाव्यम्* (महामहोपाध्यायमल्लिनाथप्रणीत-सञ्जीविनीसंस्कृत-हरिप्रियाहिन्दीव्याख्योपेतम्); कालिदासः; रामचन्द्रः झा (सम्पादकः); लक्ष्मीप्रपन्नाचार्यः (हिन्दीव्याख्याकारः); वाराणसी- कृष्णदास अकादमी; २००२।

८. *वैयाकरणसिद्धान्तकौमुदी* (द्वितीयो भागः); भट्टोजिदीक्षितः; गिरिधरशर्मा, परमेश्वरानन्दशर्मा च(सम्पादकौ); दिल्ली- मोतीलाल बनारसीदास; २०१२।
९. *शब्दकल्पद्रुमः* (द्वितीयो भागः); राधाकान्तदेवः बाहादुरः; वरदाप्रसादवसुः, हरिचरणवसुश्च (प्रकाशकौ); वाराणसी- चौखम्बा संस्कृत सीरीज आफिस; १९६७।

✶ ✶ ✶

# आधुनिकेऽस्मिन् कालखण्डे संस्कृतानूदितसाहित्यस्य योगदानम्

**मौमितावरः** *

॥मङ्गलाचरणम्॥

निधाय हृदि गोविन्दं ब्रह्माणमीश्वरंस्तथा।
सृष्टिस्थितिविनाशानां मौलिकं निदानत्रयम्॥
वन्देऽहं गुरुचरणं पितरौ परमेश्वरौ।
येषां कृपाकणां लब्ध्वा बर्धिताऽहं दिने दिने॥
तेषां प्रसादतो मुदा रचनेयं समर्प्यते।
तेभ्यो नवभाषितेभ्यो ये चान्यत्र प्रतिष्ठिताः॥

**उपक्रमणिका**

'संसरतीति संसारः'- इत्युक्त्यनुसारं प्रतिक्षणं परिवर्तमानः संसारोऽयम्, नास्ति तत्र संशयलेशः। अस्माभिर्ज्ञायते यत्साहित्यं संसारस्य प्रतिबिम्बस्वरूपम्। अतः तत्र वैविध्यपरिदर्शनं स्वाभाविकमेव। कालक्रमेण यान्त्रिकयुगेऽस्मिन् ग्रामेषु नगरेषु देशेषु च अन्तर्वर्तिभेदः ह्रासमानः अस्ति। यस्मात् समाजे क्रमशः सांस्कृतिक-सामाजिक-आर्थिक-राजनैतिकविकाशाः दृग्गोचरीभूयन्ते। गतिशीला नदी यथा कालेन सह विविधघातप्रतिघातान् सोढ्वा पूर्वतनं किञ्चित् तत्त्वं त्यक्त्वा, किञ्चित् पुनः स्वीकृत्य, अपि च नवीनतत्त्वेन सह निरन्तरम् अग्रे गच्छति। तथैव साहित्यसंसारोऽपि प्राचीनपरम्परां किञ्चित् परित्यज्य किञ्चिद्वा अनुसृत्य तथा नवीनपरम्परागतचिन्तनेन सह सततं प्रवहमानोऽस्ति।

भाषाणाम् आविष्कारात् परं यदा मानवसमाजस्य विकाशः विस्तारश्च जायमानः आसीत् तदा सम्पर्कस्य आदानप्रदानप्रक्रियायाः विस्तारस्य आवश्यकता अनुभूता, तदा अनुवादकार्यस्य आरम्भः जातः। ऐतिहासिकतथ्यानुसारं प्राचीनकाले कश्चिन्नृपः राज्यसीमावर्धनार्थम् अन्यदेशाक्रमणाय निर्गच्छति स्म, तदा द्विभाषिजनान् सहैव नयति स्म। तस्मात् ज्ञायते यत् प्रारम्भे अनुवादपरम्परा मौखिकरूपेणैव प्रसृता आसीत्।

---

* Assistant Teacher in Kalinagar High School

साहित्यक्षेत्रे अनुवादकार्यम् अनन्तरं गुरुत्वं प्राप्तम्। वस्तुतः आदौ देशाटनाय ये पर्यटकाः यात्रामार्गे विभिन्नदेशान् गतवन्तः, तत्रत्याः भाषाः पठित्वा तत्तद्भाषीयश्रेष्ठग्रन्थानां स्वस्वभाषासु अनुवादं कृतवन्तः ये यात्रिणः, ते एव अनुवादस्य शलाकापुरुषाः आसन्।

अतिप्राचीनता हि यस्याः विशेषता, अनेकासां भाषाणां जननी-स्वरूपा या भाषा, या शतकेभ्यः प्रवाहितपरम्पराणां परम्परा वर्तते, शाश्वतमूल्यानाम् आधारशीला, यत्र वहिस्तात् किमपि स्वीक्रियते चेत् नावज्ञायते एव यत् किमपि मिलितं, सैव संस्कृतभाषा अतीव उत्कृष्टा युगपोयोगिनी च।

प्राचीनभारते संस्कृतभाषा आत्मानं तादृशि उन्नतासने प्रतिष्ठापितवती यत् अस्याः भाषायाः लेखकाः देशीयभिन्नभाषासु संस्कृतग्रन्थानामनुवादे उत अनुवादसम्पर्किते अध्ययने किञ्चिदपि आग्रहिणः न जाताः इति मतं कैश्चित् प्रकाश्यते चेदपि मतमेतत् पूर्णतया सत्यं न। आरम्भकालादेव भारतं बहुभाषिदेशः अस्ति। संस्कृतेतरभाषातः लौकिकसंस्कृतसाहित्यरचनायाः प्रेरणा गुणाढ्यस्य कथां विहाय अन्यत्रापि दृश्यते। लौकिकसाहित्ये कथा-दृश्यकाव्येष्वपि संस्कृतेतरभाषाणां संस्कृतेन सह युगपत् प्रयोगः दृश्यते स्म। भासकालिदाससदृशाः अपि तेषां काव्ये प्राकृतेन सह संस्कृतस्य (संस्कृतानुवादस्य वा) युगपत् प्रयोगं कृतवन्तः। उदाहरणं यथा-

ईसीसिचुम्बिआइं भमरेहिं सुउमारकेसरसिहाइं।
ओदंसअन्ति दअमाणा पमदाओ सिरीसकुसुमाइं।[१]
ईषदीषच्चुम्बितानि भ्रमरैः सुकुमारकेशरशिखानि।
अवतंसयन्ति दयमाणाः प्रमदाः शिरीषकुसुमानि॥[२]

[शकुन्तला, ४.१]

एतेन प्रमाणीयते यत्, लौकिकसंस्कृतसाहित्ये अनुवादकार्यं बहु पूर्वादेव सामान्यतः अनायासेन प्रचलदासीत्।

यदा हि मानवमनसि सुललितसंवेदना प्रकटिता तथा काव्यानुभूतिः प्रस्फुटिता, तदारभ्य एव विश्वस्य विभिन्नभाषासु काव्यरचना प्रारब्धा। अपि च तेषु समुत्कृष्टानां पुनः

१ प्राकृतम्
२ संस्कृतम्

इतरभाषासु अनुवाद-प्रक्रियाऽपि तदारभ्य एव प्रचलन्ती अस्ति। मानवग्रन्थागारस्य सर्वप्रथमः ग्रन्थस्तु पद्यनिबद्धः ऋग्वेदः एव। ग्रीक-चीनी-अरबी-प्रभृतिषु भाषास्वपि सहस्रवर्षेभ्यः काव्यरचना प्रचलिता। कालिदासरचना होमर-दाँते-शेक्सपीयर्-इत्यादीनां रचनासदृशी एव विश्वजनविदिता, यस्य पृष्ठतः अनुवादस्य महती भूमिका न तु अस्वीकरणयोग्या। यतः एतेषां क्रान्तदर्शिकवीनाम् अमरकीर्तीनां यदि अपरापरविभिन्नभाषासु अनुवादः न भवेयुः, तर्हि प्रायः एतेषां ख्यातिः तावत् सर्वत्र न प्रसरेत्। अस्मद्देशीय-संस्कृति-तत्त्व-चिन्तन-विचारदर्शनसंयुतानाम् उपनिषदाम् महिमा प्रायस्तावत् सुदूर-पर्यन्तं विस्तृतः न भवेत् यदि शापेनहावर-सदृशाः पाश्चात्यविद्वांसः तासां वैदेशिकभाषासु अनुवादं न कुर्युः। 'अभिज्ञानशाकुन्तलम्' इति कालिदासीयकृतेः सर्-विलियम्जोन्समहाभागेन कृतानुवादस्तु विश्ववासिनां हृदयस्पर्शी अभवत्। वेद-श्रीमद्भगवद्गीता- पञ्चतन्त्रीयकथा-तुलसीदासकृत-रामचरितमानसेत्येतादृशानां बह्वीनां संस्कृतकृतीनां विश्वस्य अगणितभाषासु अनुवादेनैव तासां हृदयस्पर्शिता उत्कृष्टता कीदृशी आसीत् तदनुमातुं शक्यते। कालजयिफारसीकवेः उमरखैयाम-महाभागस्य 'रूबाइ' इत्येतेषामपि अगणितभाषासु अनुवादः जातः, यासु संस्कृतभाषा अपि अस्ति। आङ्ग्लभाषापारङ्गतः काव्यानुवादकः फिटजेराल्डमहाभागः 'रूबाइ' इत्येषां यदनुवादं संसाधितवान्, तस्य गुणग्राहिता हृदयाकर्षकता मूलादपि अधिकं वर्तते। यस्मात् 'उमरखैयाम' इति नाम्नः अपेक्षया 'फिटजेराल्ड' इत्यस्य परिचितिः ख्यातिश्च अधिकं स्थानं परिव्याप्य विद्यते। अनूदितग्रन्थोऽयमेव पाठकसमाजेन अधिकतया पठितः।

ईदृशसंस्कृतानुवादेषु तेऽनुवादाः बाहुल्येन लोकप्रियताम् अर्जितवन्तः, येषां मूलभाषीयकथाः तावत् सर्वदा सर्वथैव जनमुखेषु कथ्यमानाः आसन्। तद्यथा गीर्वाणवाण्यां रामचरितमानसस्य, रवीन्द्र-नाथकृत-गीताञ्जलेः, कबीरस्य दोहा-इत्येषां, बिहारिणः दोहा-इत्येषां, नन्ददासकृतभ्रमरगीतस्य, जयशंकरप्रसादकृतस्य कामायनी-इत्यस्य समर्थरामदासकृत-मराठीभाषीयः 'दासबोधः' इत्येतादृशानां बहुजनप्रियसाहित्यानां संस्कृतानुवादोऽपि पाठकहृदयमान्दोलितवान्। भारतीयसाहित्यानां संस्कृतानुवादस्तु

संस्कृतविद्वद्वरेण्यैः स्वतस्फूर्ततया कृत इति विषयः न तु अस्वाभाविकः। किन्तु उमरखैयामस्य फारसीभाषीयस्य 'रूबाइ' इत्यस्य सर्वाधिकसंख्यकानुवादः गीर्वाणवाण्यामेव जातः इति विषयस्तु महदाश्चर्यं जनयति। तस्य विविधानुवादेषु अष्टानामनुवादानां विषयः सातकडिमुखोपाध्यायेनैव उल्लिखितः।[3]

वस्तुतः यदारभ्य संस्कृतविद्वद्भिः अन्यभाषा परिज्ञाता, तस्मात् कालादेव तत्तद्भाषीयसमुत्कृष्टसाहित्यानां संस्कृतेऽवतारणं तैः प्रारब्धम्। पैशाची-प्राकृतनिबद्धायाः कालजयिरचनायाः बृहत्कथायाः संस्कृते त्रयः पद्यानुवादाः कृताः विद्वत्त्रयेण। तद्वत् तमिल-कन्नड-मराठी-प्रभृतिभारतीयभाषानिबद्धसाहित्यानां संस्कृतेऽवतारणस्य रीतिरपि बहुकालादेव प्रचलिता। वङ्गभाषीयोपन्यासानां संस्कृतानुवादकार्येण तु संस्कृतसाहित्येतिहासे कस्यचित् नवयुगस्य शुभागमनं कारितम् इति परिदृश्यते। वैदेशिकभाषासु आङ्ग्लभाषानिबद्धानां शेक्सपीयरवर्यकृतनाटकानां संस्कृतान्तरणं बहुभिः विद्वद्भिरेव कृतम्। कुराण-वाइवेल-आदिधर्मग्रन्थाः अपि संस्कृते उपलभ्यन्ते अनुवादप्रक्रियया।

संस्कृते ईदृशानुवादमाध्यमेन संस्कृतसाहित्यस्य व्याप्तिवर्धनस्य इतिहासविषये केषाञ्चन लेखाः बहु तथ्यपूर्णाः ख्याताश्च। तासु लेखासु वङ्गीयख्यातसंस्कृतविदुषः सातकडिमुखोपाध्यायस्य संस्कृतानुवादसम्पर्कितनिबन्धः 'संस्कृतेऽनूदितसाहित्यम्' इति शिरोनाम्ना 'सागरिका' इति शोधपत्रिकायां २०१३ क्रिस्ताब्दे प्रकाशितः। डा.राघवन्-कृतः ग्रन्थः 'कंटेम्परारी इंडियन लिटरेचर' इति शीर्षकेण प्रकाशितः, यत्र आधुनिकसंस्कृतसाहित्यविवरणप्रसङ्गे संस्कृतेतरविभिन्नभाषाभ्यः संस्कृतेऽनूदितसाहित्यस्य तथ्यबहुला विवृतिरुपलभ्यते। अपि च इलाहावादतः प्रकाशित-दृक्-इति पत्रिकायां विषयेऽस्मिन् देवर्षिकलानाथशास्त्रि-नारायणदाशादीनां लेखाः अपि तथ्यपूर्णाः। एताः लेखास्तु शोधकार्येऽस्मिन् उपजीव्यरूपेण विशेषसहायकस्वरूपाः जाताः।

मुद्रणव्यय-विक्रयणाभाव-प्रकाशकाभावादिसमस्यापीडिते संस्कृतसमाजे प्रसिद्धकवीनां कश्चन गणोऽत्र दरीदृश्यते। इतः किञ्चिदग्रेसरन्तः मञ्जूषार्वाचीनसंस्कृत-संस्कृतप्रतिभा-

[3] संस्कृतेऽनूदितं साहित्यम् (भारतीयभाषाभ्यः वैदेशिकभाषाभ्यश्च)

भारतमुद्रा-सम्भाषण-सन्देश- कथासरित्-संस्कृतमञ्जरी-सम्पादकाः धारावाहिनीरूपेण दीर्घग्रन्थान् प्रकाशयन्ति। ततोऽप्यग्रे केचन सम्पादकाः प्रसिद्धवैदेशिककथाः, भारतीयकथाः, उपन्यासान् च सङ्गृह्यानूद्य स्म्पादयन्ति। बहुपृष्ठात्मकाः विशालकायाः उपन्यासाः काव्यग्रन्थाश्च संस्कृतसाहित्यक्षेत्रे अनूदिताः प्रकाशिताः सन्तीति नूनमानन्दस्य विषयः। तद्यथा - ४६७-पृष्ठात्मकः संस्कृतेऽनूदितः उपन्यासः 'याज्ञसेनी' इति। साम्प्रतिकानूदितसाहित्यं स्वकीयं नव्यं भव्यं च प्रस्थानं निर्माति इतरभाषीयकाव्यानाम् अनवद्यास्वादनेन तत्समशब्दप्रयोगचमत्कारितया च। एवं प्रतीयते यत् एकविंशशतकारम्भकालीन-परिवर्तनेन सह संस्कृतेऽनूदितसाहित्यस्यापि महाप्रस्थानं समारब्धम्।

वस्तुतः संस्कृतभाषा यथा चिरपुरातनी सनातनी च, तथैव प्रतियुगं पुनःपुनर्जायमाना उषा इव। अभिनवं प्रभाभास्वरं प्रातः कल्पयितुमर्हा इदानीमपि स्वमहिम्नि प्रतिष्ठितेति जानन्त्येव सर्वे भारतीयसमुपासकाः। सम्प्रति संस्कृतसाहित्यस्य समृद्धिरियं विस्मयं जनयति, यस्याः प्रमुखमेकं कारणं तु संस्कृतेऽनूदितसाहित्यम्। प्रसङ्गेऽस्मिन् अभिराजराजेन्द्रमिश्रवर्यस्याभिमतस्य उल्लेखं कर्तुं शक्यते यत्, विंशशताब्दी संस्कृतसाहित्यस्य किञ्चन सुवर्णयुगम् इति।

संस्कृतभाषाचर्चावसरे अनुवादस्य द्वैरूप्यम् अस्माभिर्दृश्यते। प्रथमं तावत् संस्कृतभाषातः अन्यभाषायामनूदितसाहित्यं द्वितीयञ्च संस्कृतेतरभाषाभ्यः संस्कृतेऽनूदितं साहित्यम्। संस्कृतसाहित्यानाम् इतरभाषासु अनुसर्जनेन संस्कृतं वैश्विककाव्यफलकोपरि स्थापितं भवति। अपरत इतरभाषाभ्यः संस्कृते अनुवादकार्ये नियुज्यमानानां चत्वारि पञ्च वा लक्षपरिमितानां संस्कृतप्रेमि-लेखकानां तत्तद्भाषाणां प्रगतिभावविश्वविभागैः(आयाम) सह परिचयं कारयति तथा च तान् बहुजनहिताय बहुजनसुखाय च प्रेरयति।

शोधपत्रेऽस्मिन् आधुनिककालखण्डे संस्कृतबाङ्मयस्य भूमिकाविचारं लक्ष्यीकृत्य संस्कृतेतरभारतीयभाषाभ्यः पुनश्च विभिन्नवैदेशिकभाषाभ्यः संस्कृतेऽनूदितसाहित्यविषये यथालब्धतथ्यानुसारम् अर्जितज्ञानेन च मया चर्चा विहिता।

प्रसङ्गेऽस्मिन् अनुवादकार्यमिदम् आधुनिककालिकेषु

विविधक्षेत्रेषु कीदृशं प्रभावं जनयति विशेषतया संस्कृतानूदितसाहित्यस्य कियद् योगदानं वर्तते अपि च संस्कृतानूदितसाहित्यस्य शक्तिः दौर्वल्यम् अवसरः चेत्यादिविषयाः यथालब्धज्ञानम् संक्षेपेणोपस्थाप्य अथ संस्कृतानूदितसाहित्यं समाजं राष्ट्रं तथा विश्वमेकनीडं कर्तुं कियता प्रमाणेन सक्षमं जातमिति विषयप्रतिपादनेन संस्कृतानूदितसाहित्यस्य माहात्म्यं परिकीर्तितम्।

किं बहुना आपरितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम् इति कालिदासीयं वचनमनुस्मृत्य स्वात्मानं विद्वत्परितोषपात्रीकर्तुकामया मया विरम्यते।

अनुवाद इत्यस्य कोऽर्थः – अनुवाद इत्यस्य कः अर्थ इति पृष्टे सति उच्यते अनु-इति शब्दस्तु बह्वर्थकः। किन्तु अनुवादस्य महर्षिगौतमोक्तलक्षणमङ्गीकृत्य अनु इत्यस्य पश्चादित्यर्थ एवात्र गृहीतः। 'विधिविहितस्यानुवचनमनुवादः' (न्यायसूत्रम् ११.१.६५) इत्यस्मिन् सूत्रे अनुवादशब्दस्थम् अनुरिति अव्ययं तु महर्षिणा गौतमेन पश्चादित्यर्थे एव प्रयुक्तम्। विधेरनुवचनं विहितस्य वाऽनुवचनमनुवादः। सूत्रकारगौतमस्य अभिमतमनुसृत्य वृत्तिकारेण आचार्येण विश्वनाथेन अनुवादस्य सुस्पष्टं लक्षणं प्रदत्तम् - 'प्राप्तस्य अनु-पश्चात् कथनं सप्रयोजनमनुवादः'।

अनुवादसम्पर्किताधुनिकचिन्तने न्यायशास्त्रगतम् अनुवादस्य वीजमेव प्रकाश्यते। पार्थक्यं तावदेव यत् न्यायमतानुसारमनुवादस्य प्रयोगः समानभाषायाः अन्तर्गतः। तत्राधुनिकचिन्तनानुसारं कस्याश्चिद्भाषातः भिन्नभाषायां पुनःकथनमनुवादः। एकस्याः भाषायाः आधारीभूतभावचिन्तनस्य अन्यस्यां भाषायां प्रवाहकरणमेव अनुवादः। अवगतार्थस्य प्रतिपादनमेव 'अनुवादः' इति। एवमेव क्रमेण एषः शब्दः उदितशब्दस्यानुकरणेऽपि प्रवृत्तः। कालक्रमानुसारम् अनुवादशब्दोऽयम् एकस्याः भाषायाः इतरभाषायां रूपान्तरणे रूढः जातः। वर्तमाने प्रायः भाषान्तरकरणमेव अनुवादशब्दस्यार्थ इति विद्वद्भिः स्वीक्रियते। यद्यपि अनुवादः न केवलं भाषान्तरणम्, संवेदनात्मकभावोऽपि भवेत्तत्र। स्रोतभाषायाः परिवर्ते लक्ष्यभाषायां केवलं शब्दकोशीयार्थप्रस्तुतीकरणेन अनुवादः न स्यात्, वास्तविक-हृदयग्राह्यार्थप्रस्तुतीकरणेनैव यथार्थानुवादः सम्पद्यते।

वस्तुतः अनुवादलक्षणरूपेण अद्यत्वे यत् प्रत्यभिज्ञायते

सर्वैरङ्गीक्रियते च प्राचीनकाले तु तन्नासीत्। तदा तु किञ्चिद्भिन्नतया एव अनुवादस्य संज्ञा क्रियते स्म।

याः भाषाः संस्कृतभाषिणः संस्कृतग्रन्थरचयितारः च जानन्ति स्म तासु प्राकृतेतिसामान्य-व्यपदेशेन प्रत्यभिज्ञाता लोकभाषा एव प्रधाना। प्राकृते निबद्धाः कृतयः येन संस्कृतज्ञाः जानीयुः तदर्थम् उपायद्वयमाश्रीयते स्म। प्रथमस्तावत् मूलकृतौ निबद्धपङ्क्तीनां ध्वनिपरिवर्तनेन संस्कृतान्तरणं, यत्तु छायाशब्देन व्यपदिश्यते। यथा- गाथासप्तशती-सेतुबन्ध-गउडवह-इत्यादीनां प्राकृतकाव्यानां छायाः प्रसिद्धाः। द्वितीयस्तु मूलग्रन्थे वर्णितविषयाणां गीर्वाणवाण्यां भावानुवादकरणम्। तद्यथा गुणाढ्यकृत-पैशाची-प्राकृतभाषीय-बृहत्कथायाः सुरगिरा त्रयः भावानुवादाः उपलभ्यन्ते। तेषु प्राचीनतमः 'बृहत्कथाश्लोकसंग्रहः' बूधस्वामिवर्येण विहितः, द्वितीयः क्षेमेन्द्रकृतः 'बृहत्कथामञ्जरी', तृतीयश्च सोमदेवभट्टकृतः 'कथासरित्सागरः'। परन्तु वर्तमाने भाषान्तरकरणमेव अनुवादशब्दस्यार्थ इति विद्वद्भिः स्वीक्रियते। कैश्चित् अनुवादविशेषज्ञैः पुनः चिन्त्यते यदनुवादे लिप्यन्तरणस्य विशेषं गुरुत्वं वर्तते। विशेषतः विज्ञानपरकानुवादकाले लिप्यन्तरणपद्धतिः अवश्यमेव अवलम्बनीया। परन्तु वैज्ञानिकग्रन्थेषु लेखेषु वा लिप्यन्तरणस्य प्रसक्तिरस्ति चेदपि साहित्यक्षेत्रेषु प्रायः नास्ति एव। अपि तु अतिव्याप्त्यादिदोषाय एव प्रसङ्गोऽयमिति मे मतम्।

अनुवादविशेषज्ञचिन्तनानुसारम् अनुवादस्तु काचित् कला अस्ति। 'शक्तिर्निपुणता...'[४] इत्यत्र प्रोक्तानि काव्यसृष्टेः सर्वाणि कारणानि अनुवादाय अपि अपेक्ष्यन्ते। यथा सर्वं चित्रं रेखामयं भवति चेदपि रेखामात्रमेव चित्रं न, तथैव भवति काव्यादिकं तदनुवादः वा। चित्रस्थितं रेखातिरिक्तं वैशिष्ट्यमिव काव्ये अनुवादे वा आत्मतत्त्वं किञ्चन भवति। प्रत्येके अनुवादकार्ये तत् अपरिहार्यतया भवेत्।

अनुवादस्तु परकायायां प्रवेशः। प्रवेशकार्यमिदं न तु सरलम्। अनुवादकेन अनुवादकाले भूमिकात्रयं पालनीयं भवति। तद्यथा– पाठकभूमिका, द्विभाषिकभूमिका, लेखकभूमिका च। सम्पूर्णं कार्यमिदं सम्पादयितुम् अनुवादकेन पञ्चविधपर्यायाणाम् अतिक्रमणं

---

४ शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणा।
काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥ (काव्यप्रकाशः)

करणीयम्। तद्यथा–पाठपठनम्, पाठविश्लेषणम्, भाषान्तरीकरणम्, समायोजनम् तथा च पुनरीक्षणं तुलना वा।

**संस्कृतानूदितसाहित्यमाहात्म्यकीर्तनम्**

संसारस्य समग्रं ज्ञानं विज्ञानं च एकस्यां भाषायामेव तु नैव वर्तते अपि तु जीवनकालोऽपि सीमितः एव। तादृशप्रसङ्गे विश्वस्य सामग्रिकज्ञानाहरणाय अनुवादः स्वयं विशेषः महत्वपूर्णः, यस्य चिन्तनं तु भाषां विना कर्तुं न शक्यते।

संस्कृते अनुवादार्थं भाषा-ध्वनि-अर्थ-वाक्य-रूप-शब्दविज्ञानानां ज्ञानमावश्यकमेव। इत्थं हि संस्कृतानुवादकार्यं नवजागरणचेतनानिर्माणाय शिक्षा-सामाजिकक्षेत्रे समानता-सद्भावनयोः संरक्षणाय विविधजातिषु सम्बन्ध-विकासाय अपि च राष्ट्रियसम्बन्धस्थापनाय जनसामान्यस्य तथा राष्ट्रस्य उपयोगमावहति।

संस्कृतसाहित्यस्य अन्यतमा समृद्धशाली शाखा वर्तते अनुवादकार्यमिदम्। संस्कृते अनुवादकार्यस्य प्रयोजनं किमिति पृच्छायां कस्याश्चिद् जातेः समानभाषाभाषिगोष्ठ्याः वा भाषायाम् अन्तर्निहिताः भवन्ति तस्याः गोष्ठ्याः मनुष्याणां भावसम्पद्, जातीयजीवनस्य सामग्रिकी आशा आकाङ्क्षा रीतिः नीतिः चेत्यादयः। अतः जातेः चिन्तनस्य सामग्रिकमैश्वर्यभाण्डारस्वरूपं ज्ञातुम् अनुवादस्य प्रयोजनमस्ति। अर्वाचीनसंस्कृतसाहित्यस्य समीक्षणेन ज्ञायते यत् क्रैस्ताब्द-एकोनविंश-विंशशताब्द्योः संस्कृतेऽनूदितसाहित्यं सुतरां समृद्धिं प्राप्तं यस्य विशेषं माहात्म्यं वर्तते।

**भाषागतविकाश-समन्वयिकदृष्ट्या**

भाषा अस्ति परम्परागत-अर्जितसम्पत्तिः, यथा मनुष्याः पारम्परिक-विचारविनिमयेन लाभान्विताः भवन्ति। तद्वत् भाषायाः क्रमोन्नतिः तथा विकाशोऽपि पारस्परिकविनिमयेनैव सम्भवति। इयं भाषा तरङ्गिणीव गतिशीला परिवर्तनशीला च। भाषायाः गतिपरिवर्तनस्य बहूनि कारणानि वर्तन्ते। भाषायां नवशब्दानां निर्माणं जायते तामेव भाषामाधारीकृत्य उत स्रोतभाषातः अनुवादकारणतः। इत्थं गतिपरिवर्तनकारणतः तस्याः भाषायाः अभिव्यञ्जना-शक्ति-माधुर्य-ओजदृष्ट्या क्रमोन्नतिं साधयितुं शक्यते।

नवशब्दसंसर्जनेन संस्कृतस्य मौलिकता अक्षुण्णा तिष्ठति अपि

च संस्कृतभाषा पुष्कला सुसमृद्धा जीवन्ता च भवति इत्यत्र नास्ति संशयलेशः। अनुवादकार्येण बहूनाम् आधुनिकसंस्कृतशब्दानां निर्माणं भवति येन संस्कृतसाहित्यस्य विशेषेण उपकारः भवति। यथा – दूरदर्शनम् (टि.भि.), शीतकम् (फ्रीज), दूरभाषः (दूरवाणी), चित्रग्राहकयन्त्रम् (क्यामेरा), द्विचक्रिका (साइकल), वाइकयानम् (मोटरसाइकल) इत्यादयः। पुनश्च विविधपरिस्थित्यनुसारं संस्कृते नूतनाः शब्दाः जायन्ते। यथा- निजव्यापारिणि समवायः (प्राईवेटकंपनी), विषव्रणग्रन्थिः (ब्रेनट्यूमर) इत्यादयः। वस्तुतः नूतनशब्दनिर्माणस्य उद्देश्यमस्ति निर्वाधं सम्प्रेषणम्। येन पाठकः कथाकारस्य संदेशम् आत्मसात् कर्तुं शक्नुयात् अनायासेनैव। रसप्रवाहे कदापि वाधा न स्यात्। संस्कृतभाषायां नवशब्दनिर्माणेन भाषायाः क्लिष्टता दूरीभूता भवति चेदपि भाषाशुद्धिकरणाय पाणिनीयनियमानां पालनविषयेऽपि अनुवादकैः ध्यानं स्थापनीयम्। भाषायाः विकाशः परिवर्तनं तथा च परिवर्धनं शाश्वतं सततं प्रवाहशीलञ्च। इत्थं यावत्कालं भाषायां नूतनशब्दावलिग्रहणस्य सामर्थ्यं स्थास्यति, तावदेव सा भाषा जीविता स्थास्यति। नूतनशब्दानां प्रयोगेण भाषा क्रमशः समृद्धा एव भवति।

अपि च अनुवादकार्येण भाषायाः आङ्गिकसौन्दर्य्यं कलाकौशलं प्रयोगरीतिः चेत्यादीनि अन्यभाषायां सञ्चरन्ति। एकस्याः भाषायाः शब्दभाण्डारः वाग्धारा आलङ्कारिकप्रयोगरीतिः च अपरभाषां पर्याप्तं प्रभवन्ति। तेन भाषासु समन्वयसाधनं भवति। यथा - श्रीरामदवे रवीन्द्रनाथठाकुरकृतस्य ‘गीताञ्जलिः’ इत्यस्यानुवादः मूलवत् छन्दोमुक्तकाव्यशैल्या एव कृतः, शाह-अब्दुललतीफ इति प्रसिद्धसिन्धीकवेः सुफीकवितानामनुवादः छन्दोवद्धसंस्कृते विहितः, जयशंकरप्रसादकृतनाटकस्य ‘ध्रुवस्वामिनी’ इत्याख्यया तथा च प्रेमचन्द्रकृतस्य ‘निर्मला’ इत्युपन्यासस्य अनुवादः नाटकस्य तथा उपन्यासस्य शैल्या एव विहितः। दवेवर्यस्य अनुवादस्य विशेषता अत्रैव यत् अनुवादकेन मुलसाहिस्यैव शैली अनुवादकाले संस्कृते अवतारिता। इत्थं भाषागत-आलङ्कारिकसमन्वयसाधनं जायते।

**मानविकतादृष्ट्या**

पृथिव्याः विभिन्नेषु कोणेषु विद्यमानाः मनुष्याः समानाश्चेदपि भौगोलिक-सामाजिक-सांस्कृतिक-आर्थिक-भाषिकादिसीमाः एव

मनुष्येषु पारस्परिकभेदान् उत्पादयन्ति। विशेषतः भाषागतसीमा तु प्रसङ्गेऽस्मिन् सर्वाधिकं प्रभावं जनयति।

तत्र भाषिकसीमाम् अतिक्रामयितुं समधिकफलदायी तथा प्रसिद्धः माध्यमस्तु अनुवादः। संस्कृते अनुवादकार्यमिदं मानवजातेः मानवीयसंवेदनाविकाशस्य तथा च ज्ञानवर्द्धनस्य विशेषः आधारस्वरूपः।

संस्कृते अनुवादकार्यस्य प्रयोजनं न केवलं साहित्ये अपि तु अन्तःसांस्कृतिककार्यक्रमादीनां संवर्द्धनार्थम् तथा प्रोद्योगिक-स्थानिकीकरणयोः प्रक्रियायाः अभिन्नाङ्गस्वरूपवैश्विककरणदृष्ट्या सहैव अग्रेसर्तुम् अत्यावश्यकं साधनस्वरूपमस्ति संस्कृतानूदितसाहित्यम्।

**संस्कृतीनां समन्वयः**

अनुवादेन विविधजातीनां पारस्परिकभावसम्पदां विनिमयः (आदानं प्रदानं च) भवितुं शक्यते। विभिन्नदेशीयमनीषिणां भावचिन्तनैः आत्मानं ज्ञानसमृद्धं कर्तुं शक्यते। पृथिव्यां स्थितदेशानां प्रामाण्यग्रन्थसमूहस्य विषयवस्तून् ग्रन्थान् वा स्वीकर्तुं शक्यते। उदाहरणत्वेन उल्लिख्यते संस्कृतानुवादकार्यमाध्यमेन स्वजीवनं संस्कृतसेवायै उत्सर्गीकृतवता उत्कलनिवासिना अच्युतानन्ददाशवर्येण मङ्गोलदेशीया काचन लोककथा (सप्तर्षिमण्डलस्य उत्पत्तिमाश्रित्य प्रचलिता कथा) सुष्ठुरूपेण अनूदिता यत्र मङ्गोलदेशीयसंस्कृतेः सम्यगवतारणं कृतम् इति परिदृश्यते। अपि च दाशवर्येण लेवटाल्स्टायवर्येण लिखितायाः मनुष्यस्य लोलुप्त्वस्य कुफलप्रदर्शनपरायाः कस्याश्चित् कथायाः संस्कृतान्तरणं कृतम् इत्येतादृशानि नैकानि संस्कृतानूदितसाहित्यानि उपलभ्यन्ते यैस्तु प्राच्यानामपि तु पाश्चात्यानां संस्कृतीनां ज्ञानलाभः तथा समन्वयसाधनं भवति।

**व्यवहारगतदृष्ट्या**

पृथिव्याः विविधप्रान्तानां विविधदेशानाञ्च ज्ञानम् अनुवादकार्येण संस्कृतभाषायां लभ्यते। सांवादिकता द्विभाषिवृत्तौ चापि विशेषः सहायकः भवति अनुवादः। सूचनाप्रोद्योगिक्याः विकाशात् पूर्ववर्तिषु केषुचिद्वर्षेषु सञ्चारव्यवस्थायाः विशेषोपादानानाम् असामान्या

प्रगतिर्जाता। संस्कृतानुवादकार्येणैव आकाशवाण्यां तथा च दूरदर्शने स्वदेशीयवैदेशिकविविधवार्तानां संस्कृते प्रसारणं सम्भवति। संस्कृतभाषया विविधविषयपरकाणां चलच्चित्राणां विज्ञापनानाञ्च निर्माणेऽपि अस्यानुवादकार्यस्य महती भूमिका वर्तते।

**शिक्षा-अनुसन्धानगतदृष्ट्या**

वैश्वीकरणसन्दर्भे शैक्षिकानुसन्धानादिक्षेत्रेषु अनुवादस्य सर्वाधिकोपयोगः वर्तते। शैक्षिकक्षेत्रे ज्ञानविज्ञानयोः सामग्रिणाम् अन्तर्राष्ट्रियस्तरे पृथिव्याः प्रत्येकं देशः शिक्षणसंस्थाश्च पारस्परिकादानप्रदानं च कुर्वन्ति, यत्तु अनुवादमाध्यमेनैव सम्पद्यते। विषयज्ञानं लब्धुम् अनुवादस्य महती उपयोगिता वर्तते। प्रसङ्गेऽस्मिन् रवीन्द्रनाथेनोक्तं यत् प्रकृतपुस्तकं न लभ्यते चेत् अनुवादकरणे दोषः नास्ति। ज्ञानं विज्ञानं च कुत्रापि भवतु, भाषा मातृवत् भवेत्।[५] 'ला फाँतेन' इति फारसिकवेरनुकृतस्य 'रसाल' 'स्वर्णलतिका' चेति नीतिगर्भात्मककविताद्वयस्य सीतानाथाचार्यकृतस्य संस्कृतानुवादः काव्यनिर्झरीग्रन्थे उपलभ्यते।

विविधानुसन्धानानां गवेषणानां वा परिणामाः अपि अन्तर्राष्ट्रियस्तरे परस्परानुवादेनैव परामृश्यन्ते। मानवहिताय पूर्णे विश्वे यानि शोधकार्याणि अनुसन्धानानि च क्रियन्ते अगणितवैज्ञानिकैः, तेषां सिद्धान्ताः समस्तमानवसमाजेन अनुवादमाध्यमेनैव ज्ञायन्ते। तद्विषयकतथ्यानि विभिन्न-देशानां नागरिकैः स्थानीयभाषाभिः एव प्राप्यन्ते, यस्य पृष्ठतः अनुवादविशेषज्ञानां निरन्तरश्रमः निहितः वर्तते। तत्र विविधाविषयकग्रन्थ-शोधकार्यादिभिः सह अस्माकं परिचयं कारयितुं संस्कृतानुवादकार्यस्य महती भूमिका वर्तते। कलिकाताविश्वविद्यालयस्य संस्कृताध्यापिका परमविदुषी डा.रत्नावसुः 'संस्कृतानुवादे रवीन्द्रसाहित्य' इति शिरोनाम्ना वङ्गभाषायां कश्चिन्निबन्धं निर्मितवती यस्तु कोरपत्रिकायां प्रकाशितः।

**ज्ञान-विज्ञानगतदृष्ट्या**

अद्यत्वे वैश्वीकरणप्रोद्योगयोः पारस्परिकसम्बन्धवशात् ज्ञान-विज्ञानयोः सर्वत्र विकाशाय प्रसाराय चानुवादः आवश्यकः साधनस्वरूपो जातः। अनुवादप्रक्रियया स्वभाषया

[५] वांला शिक्षण विद्या, ड.सुविमलमिश्रः, पृ.२०६

अन्यभाषोपनिबद्धकृतीनां पठनावसरे लब्धे सति मानवसमाजेन अतिसारल्येणैव अवबुद्धमिदं यत् भौगोलिक-सामाजिक-आर्थिक-भाषिकादिसीमाः न तु प्रकृतिगताः अपि तु मनुष्यकृतकृत्रिमसीमाः।

वस्तुतः भाषा अस्मद्विचारचिन्तनानामनुवादस्वरूपा इति कथनं न तावत् अयौक्तिकम्। अस्माभिर्यत् चिन्त्यते, तस्य शब्दैः लेखनस्य प्रयासः क्रियते। भाषा निर्दिष्टसीमां यावत् अस्मद्विचारान् आबद्धुं शक्नोति। संसारेऽस्मिन् विद्यमानासु सर्वासु भाषासु उपलब्ध-सर्वविधज्ञान-विज्ञानयोः सामग्रिणः यदिदानीं स्थानीयभाषास्वपि उपलब्धाः सन्ति, तदनुवादेनैव सम्भूतम्। यथा - उत्कलप्रान्तनिवासिन्या पराम्बा-श्रीयोगमायया काभिश्चन अनूदितकथाभिः सह डा.गोकुलानन्दमहापात्रलिखितस्य 'चन्द्रर मृत्यु' इत्युपन्यासस्य 'मृत्युः चन्द्रमसः' इति शीर्षकेण संस्कृतान्तरणं कृतम्। भिन्नस्वादयुतकथाग्रन्थेऽस्मिन् मूललेखकेन चतुरतया वैज्ञानिकतथ्यानि संयोजितानि। बहुत्र अनुवादोऽयं भावात्मकः संक्षिप्तीकृतश्च वर्तते। तस्मादेव मूलतः २१७ पुटात्मकः उपन्यासोऽयं १३९ पुटैरेव अनूदितः।

**भारतीयसाहित्यगतदृष्ट्या**

भारतीयसाहित्यस्य तथा अस्मितायाः गतिप्रदानकारी सशक्तः आधारभूतः माध्यमस्वरूपोऽस्ति अनुवादः। अनेन भारतीयसाहित्यावधारणया सह वयं परिचिताः भवामस्तथा च यथार्थभारतीयाः भूत्वा वयं प्रान्तीयसङ्कीर्णताः परिसीमाः चातिक्राम्य भारतीयतां साक्षात्कुर्मः। देशस्य पारम्परिकतया प्राप्तसाहित्यिक-सांस्कृतिकसम्पदां दर्शनन्तु अनुवादेनैव सम्भवति। अनुवादमाध्यमेनैव भारतीयभाषीयाणाम् अगणितयशस्विनां सर्जकानां रचनाः अस्माकं हस्तगताः जाताः, नोचेत् भारतीयसम्बन्धि अस्मद्ज्ञानं तु नितान्तं सीमितं स्यात्।

आधुनिकमनुष्यसमाजः पूर्वादपेक्षया अधिकं जिज्ञासुप्रवणः तथा शोधपरकः जातः। अतस्तस्य जिज्ञासानां निरसनन्तु अनुवादेन प्राप्तसामग्रिपठनेन सम्भवति। केनापि मनुष्येण संसारस्य सकलभाषाणाम् आयत्तीकरणम् अशक्यम्। अतः भारतसदृशि बहुभाषिदेशे तु अनुवादस्य महद्गुरुत्वं वर्तते। विभिन्नभारतीयभाषासु

निबद्धप्राचीनाधुनिकसाहित्यानाम् आदानप्रदानस्य मुख्यसूत्रन्तु अनुवाद एव तदपि संस्कृतभाषायाम्।

संस्कृते अनुवादकार्यम् इदम् अभिनन्दनीयं, यतः साहित्यावधारणया वयं परिचिताः भवेम तथा च वयं प्रकृतरूपेण भारतीयाः भूत्वा प्रादेशिकसंकीर्णतापरिसीमा-दिवाधकान् अतिक्रम्य साक्षात्कर्तुं शक्नुयाम। देशस्य साहित्यिक-सांस्कृतिक-परम्परागत-प्राप्तसम्पदां दर्शनं तु अनुवादेनैव सम्भवति। यथा– भास्करनन्दस्वामिना कृतं **चैतन्यचरितामृतम्,** स्वामिध्यानात्मानन्दकृतं **रामकृष्णकथामृतम्,** नित्यगोपालविद्याविनोदशर्मणा कृतं **मेघनादवधम्,** सुरेन्द्रनाथदेवकृताः **वनलतासेन**कविताः, विश्वनाथभट्टाचार्यकृतः **बाल्मीकिविजयः**, एच्. वि. नागराजमहाभागकृतः **सार्थ** इति उपन्यासः, जनार्दनहेगडे-महाभागस्य **धर्मश्रीः, दृष्टिदानं** चेति; अर्वाचीनसंस्कृतविद्वत्सु बनमालिविश्वालवर्यकृतानि **तारा-अरुन्धती, पत्रालयः, जन्मान्धस्य स्वप्नः** चेति, श्रीभागिरथिनन्दमहाभागस्य **याज्ञसेनी भारतवर्षं सृष्टितत्त्वानुचिन्तनं** च, तन्मयकुमारभट्टाचार्य-नारायणदाश-राकेशदाशैः कृता **कवीन्द्रकथाकल्लोलिनी**, राकेशदाशस्य **मेघमल्लारः** इत्यादीनाम् उल्लेखः शक्यते।

**भाषावैज्ञानिकदृष्ट्या**

अनुवादस्य गुरुत्वकथनकाले वक्तुं शक्यते यत् भाषाविज्ञानिनां कार्यक्षेत्रे (linguistic) संस्कृतानुवादसाहित्यस्य महद्गुरुत्वं वर्तते। मूलसाहित्येषु रचयितृभिः प्रयुक्तशब्दानां उत्पत्तिविचारविश्लेषणार्थं पुनश्च मूलभाषीयाणां विविधपदानां संस्कृतभाषायां कीदृशं रूपान्तरणं जातम्, कदाचित्पुनः समानग्रन्थस्य बहुभिः अनूदिताः बहवः अनुवादाः उपलभ्यन्ते, यत्र एकस्य मूलशब्दस्य अनुवादार्थम् एकाधिकसंस्कृतरूपाणि प्रयुक्तानि अनुवादकैः, तेषां संस्कृतरूपाणां व्युत्पत्ति-विचारविमर्शनादिकार्यं सम्पद्यते विभिन्नैः भाषाविद्भिः।

अपरतः साहित्यरचनाकाले मूललेखकैः ये शब्दाः प्रयुज्यन्ते, मूलसाहित्यस्य संस्कृते अनुवादार्थं ये संस्कृतशब्दाः अनुवादकैः चीयन्ते, पुनश्च येषां मूलग्रन्थानां तावत् बहुभिः अनुवादकैः विभिन्नेषु कालेषु विभिन्नासु परिस्थितिसु च एकाधिकवारमनुवादः कृतः, तत्र समानशब्दस्य विभिन्नैः अनुवादसर्जकैः प्रयुक्तसंस्कृतशब्दान् निरीक्ष्य

च तेषां साहित्य-सर्जनस्य अनुवादस्य वा काल-परिवेश-परिस्थितयः, रचयितुः अनुवादकस्य वा निवासः जीवनशैली शिक्षा-इत्यादीनां निरीक्षणपूर्वकं पर्यालोचनकरणं यत् भाषावैज्ञानिकक्षेत्रे philology इत्यभिधया उच्यते, तस्य मुख्यः आलोच्यविषयः। अतः अस्मिन् क्षेत्रेऽपि अनुवादस्य महती भूमिका विद्यते।

उदाहरणत्वेनरवीन्द्रनाथठाकुरवर्यस्य गीताञ्जलेः बङ्गानुवादकेन कामिनीकुमार-अधिकारिवर्येण कृतसंस्कृतानूदितरूपात् किञ्चिदंशः उल्लिख्यते-

नीरवरात्रौ समागमत् स करकमलश्रितवीणः।
स्वप्नविमोहे गभीररागं संवाद्य प्रतियातः॥
जाग्रत् पश्यामि मलयसमीरण उन्मादयति हि विश्वम्।
गन्धस्तस्य हि वहति समन्ताद् ध्वान्तमापूर्य सर्वम्॥
अकारणं मेऽजायत रजनी नाविन्दत निकटस्थम्।
कथमेतस्य मालास्पर्शो नागलदिह हृदये मे॥

एतेषां श्लोकानां तातपर्यम् इदं यत् विलासव्यसनपूर्णजीवनयापनात् इहलोकमेव सर्वमिति मन्यमानः कश्चिज्जनः (निद्राच्छन्नः मोहाच्छन्नः वा) भगवतः उपस्थितिरपि नानुभूतवान्। यदा तेनानुभूतं तदा पुनः सर्वमन्धकारपूर्णं जातम्। तस्मात् तेन अनुतप्तकारिणा उच्यते यत् – रजनी मेऽकारणमेव व्यतीता, समीपतरं दिव्यचैतन्यमपि स नानुभूतवान्। स्वप्ने तस्य पारिजातमाल्यं स्पृष्टं चेदपि अहो ! मे दौर्भाग्यम्, तत् माल्यं मम कण्ठे नापतत्। अनेन उदाहरणेन भवबन्धने आबद्धानां संसारजीवानामज्ञानत्वात् मोहमायाच्छन्नत्वाच्च अधमत्वं भाग्यहीनत्वञ्च सूचितम्। अपि च दुःखत्रयात् आत्यन्तिकनिवृत्त्यर्थं तथा चिरमुक्तिलाभाय आत्मसमर्पणरूपमार्गोऽपि प्रदर्शितः। अत्र कवेः या आध्यात्मिकविचारधारा तथा दार्शनिकी दृष्टिः प्रकाशिता, सा भाषाविदुषां गवेषणायाः विषयः।

पुनश्च भारततीर्थम् इति रवीन्द्रकाव्यस्य रमारञ्जनमुखोपाध्यायेन, धीरेन्द्रनाथमुखोपाध्यायेन, लक्ष्मीकान्तपञ्चतीर्थेन अन्यैश्च परमश्रद्धेयकविभिः कृतम् अनुवादं परिशीलयामः चेत् तत्र दृश्यते, अनुवादकस्य रमारञ्जन-मुखोपाध्यायस्य कृतौ यथा शव्दचयनं कृतम्, तेन कविचेतनायाम् अखण्डताबोधो विकसिततमं रूपं लभते। स्वदेशस्य श्रेष्ठत्वं तथा वैश्वीकरणसामर्थ्यं यत् मूलकविना

प्रकटयितुमभिष्टं तत् अस्यानुवादकस्य अनुवादेनैव सर्वाधिकं स्फुटं जातम्।

Comparative linguistics अर्थात् तुलनात्मकभाषा-वैज्ञानिकक्षेत्रेऽपि संस्कृतानुवादसाहित्यस्य प्रभावः परिदृश्यते। समानविषयमाश्रित्य विभिन्नेषु कालेषु विभिन्नेषु देशेषु वा विभिन्नाः ग्रन्थाः विरच्यन्ते अनूद्यन्ते च, तेषां पारस्परिकतुलनाविधानकाले सामाजिक-सांस्कृतिक-राजनैतिकार्थनैतिक-परिवेश-परिस्थितीनां विश्लेषणं क्रियते भाषाविद्भिः, यत्र अनुवादसाहित्यस्योपरि निर्भरशीलता अपरिहार्या।

मूलसाहित्यस्य रचनायाः कालः, तात्कालिकसामाजिक-सांस्कृतिक- राजनैतिक-अर्थनैतिक-परिस्थितीनां विषये ज्ञानमर्जयितुं गवेषणार्थं वा अनुवादस्य विशेषेण प्रयोजनं वर्तते।

अनुवादनैपुण्येन कविताश्रितानां कविमननं विचारधारा भावादर्शः इत्यादीनाम् अन्तर्निहिताभ्यन्तरीणविषयाणाम् अनुभवः वाचकानां भवेत् इत्यस्माभिरनुभूयते।

**साहित्यिक-सांस्कृतिक-सामाजिकपरिदृष्ट्या**

साहित्यिकक्षेत्रे अनुवादस्य गुरुत्वं तु बहुकालात्परमेवानुभूतम्। अनुवादकार्यं भारतस्य बहु-आयामविशिष्टसांस्कृतिकपरम्पराणां तथा उपलब्धीनां समन्वयस्य पर्यायस्वरूपमिति कथयितुं शक्यते। भारतभूमिरियं समुद्रस्वरूपा वर्तते, यत्र धार्मिक-वैचारिक-साम्प्रदायिक-दार्शनिक-सांस्कृतिक-ऐक्यानां संगमनं जातम्। समग्रदेशस्य भौगोलिकसीमायां भग्नप्राय-सांस्कृतिकपरम्परां तथा जीवनमूल्यबोधानां सामाजिकरूपं यथार्थदिशा प्रेरितवती इयम् अनुवादप्रक्रियैव।

भाषिकवैविध्यतः एव जायन्ते सांस्कृतिक-सामाजिकादि-वैविध्यानि, यानि निवार्य विभिन्नसांस्कृतिकपरिवेशानाम् अपि सादृश्यविधानम् ऐक्यविधानं च कर्तुं सामर्थ्यं तु अनुवादे एव विद्यते। मनुष्याः स्वीयाभिव्यक्तिं तु यया कयापि भाषया प्रकाशयितुमर्हन्ति परं सैवाभिव्यक्तिः सम्पूर्णे समाजे तस्याः भाषायाः ज्ञानराहित्यात् सम्प्रेषणीया न भवेत्। तादृश्याः कठिनपरिस्थितेः काठिन्यं दूरीकर्तुं शक्नोति केवलम् इयम् अनुवादप्रक्रिया।

भारतीयसाहित्यपाठकान् परस्परयोः समीपतरान् कर्तुं प्रयासः क्रियते अनुवादेनैव। अनया प्रक्रियया न केवलं पाठकरुचिः प्रापञ्चिकसाहित्यस्य स्वादम् आस्वादयितुम् अवसरं प्राप्ता अपि च अध्ययनं तथा अनुसन्धानम् अपि नूतनदिशां सन्धानं प्राप्ते। प्रापञ्चिकसाहित्याध्ययनेन भूतकालिकेन तथा वर्तमानकालिकेन पृथिव्या सह परिचयः सञ्जातः।

**नान्दनिक-सृजनात्मक-साम्मानिकदृष्ट्या**

मानवहृदये रसबोधजागरणं दुःखनिवारणं मनोरञ्जनविधानम् अपि नान्दनिक-सर्जनात्मकदृष्ट्या अपि संस्कृतानूदितसाहित्यस्य सुमहद् गुरुत्वं वर्तते। यथा– रवीन्द्रसङ्गीतैः को वा सम्मोहितः न भवेत्? तेनैव विश्वकविना विरचितानां कर्णयोः मधुरधाराम् अभिवर्षतां मनोग्राहिणां गीतानां संस्कृते नैकेऽनुवादाः जाताः। तेषु कालिपदतर्काचार्य-दीपकघोष-सीतानाथाचार्य-राकेशदाशादि-कृतानुवादाः सुप्रसिद्धाः। एतद् अतिरिच्य द्विजेन्द्रलाल-नजरुल-भूपेनहाजारिकेत्यादीनां सुप्रसिद्धकवीनां बहुलपरिचितसङ्गीतानां संस्कृतानुवादाः अपि जनमनांसि हरन्ति।

अपरतः संस्कृतेऽनुवादकार्येण बहूनां नवीनानां कवीनां कथाकाराणां समीक्षकाणाम् अपि निर्माणं भवति। उत्कृष्टमौलिक-साहित्यरचनायां प्रेरयितुं सिद्धताम् अर्जयितुं च विशेषतया साधकस्वरूपं भवतीदम् अनुवादकार्यम्। वर्तमाने संस्कृतसाहित्या-काशे प्रोज्ज्वलमानेषु कविषु बहूनाम् एव साहित्यनिर्माणकार्यं संस्कृतानुवादेनैव समारब्धम् इति परिलक्ष्यते।

**वाणिज्यदृष्ट्या**

कार्यालयेषु तथा विचारालयेऽपि अनुवादस्य महत् प्रयोजनं वर्तते। व्यवसायिकक्षेत्रे अनुवादस्यावश्यकता दिनं दिनं बर्धमाना अस्ति। व्यवसायिकक्षेत्रे भाषाविषये काचिदुक्तिः प्रचलिता अस्ति यत् क्रेता स्वभाषया क्रीणाति परन्तु व्यापारी ग्राहकस्य भाषया विक्रीणिते इति। ('you buy in your language but you sell in the language of your customers'[६])।

---

[६] व्यवसायिक जगत और अनुवाद, डा.गोपाल शर्मा, अनुवाद का सामयिक परिप्रेक्ष्य संगोष्ठी स्मारिकाः साहित्येतर हिन्दी अनुवादः दिशाएँ और चुनौतियाँ, प्रो.दिलीप सिंह, प्रो.ऋषभदेव शर्मा(सम्पादक), पृष्ठम् ४०

वस्तुतः वर्तमानयुगे याः बहुराष्ट्रिय-व्यवसायिकसंस्थाः वर्तन्ते, तत्र स्वकीयकार्यादिकं स्वभाषया सम्पद्यते चेदपि ग्राहकैः सह सम्प्रेषणार्थं तेषां भाषाः एव उपयुज्यन्ते। एताः संस्थाः उपभोक्तृभिः सह संवादमाध्यमेन संस्थां प्रति आकर्षयितुं तथा स्वकीय-उत्पादितद्रव्यं विक्रेतुम् अनुवादरूपसेतुरेव अभिगृह्णाति।[७] एतासां संस्थानां प्रचारस्तु विज्ञापनं विहाय न सम्भवति। विज्ञापनानि आङ्गलभाषया निर्मीयन्ते चेदपि विभिन्नासु भारतीयभाषासु अनूद्य प्रचारः क्रियते, येन ग्राहकाः स्वभाषायां विज्ञापनानि दृष्ट्वा तासां संस्थानामुत्पादनं प्रति आकृष्टाः सन्तः चिक्रीषन्ति।[८]

अनुवादकार्यं विविधव्यवसायिकक्षेत्रैः सह सम्पृक्ततः स्वयमेव कश्चिद् व्यवसायः जातः। प्रसङ्गेऽस्मिन् असूलालसञ्चेतीवर्यस्य नाम उल्लेखयितुं शक्यते। असंस्कृज्ञः चेदपि अयं 'सर्वभाषाकालिदासीयम्' इत्यस्यान्तर्गतायाः स्वकीयसंस्थायाः 'मेघदूतम्' इति गीतिकाव्यस्य २५ भारतीयभाषासु १२ वैदेशिकभाषासु च कृतानुवादान् एकत्र संकल्य गिनीजपुस्तके स्वनामान्तर्भूक्तिं कृतवान्।

संस्कृतभारत्याः सरस्वतीसेवायोजनानुसारमेव के. वरलक्ष्मीवर्या आन्ध्रभाषायां प्रसिद्धायाः गीतासुब्बरावु-महोदयस्य 'पारिपोयिन बठाणी' इत्याख्यबालकथायाः अनुवादः संस्कृतेन कृतः। गीतासुब्बारावु-वर्यकृता 'पारिपोयिन बठाणी' इत्याख्या बालकथा पूर्वं वङ्ग-हिन्दी-ऊर्दू-भाषाभिः अनूदिता अपि च एतां कथामाधारीकृत्य वङ्गभाषया चलच्चित्रमपि निर्मितम्। अस्मादेव अस्याः कथायाः प्रसिद्धिमनुमातुं शक्यते। अनुवादकर्मणि नूतनानुभवसम्पन्नया अनया अनुवादिकया बालानां सहजबोध्यरूपेण सुचारुरचनाशैलीमाश्रित्यैव अनुवादकार्यमिदं विहितम्।

शिक्षाशास्त्रत्वेन अनुवादः परिगण्येत। उच्चमाध्यमिकपाठ्यक्रमे अनुवादस्यान्तर्भावविषये विद्वद्भिः चिन्तनीयम् - इति मतं प्रकाशितवान् डां नन्दलालभारती वर्यः। अनेन अनुवादस्य माहात्म्यवर्धनेन सह राष्ट्रिय-अन्तर्राष्ट्रियस्तरेषु अपि आयस्यावसराः वर्धिष्यन्ते।

---

[७] तत्रैव, पृष्ठम् ४०-४१

[८] हिन्दी विज्ञापन और अनुवाद, प्रो.ऋषभदेव शर्मा, अनुवाद का सामयिक परिप्रेक्ष्य, प्रो.दिलीप सिंह, प्रो.ऋषभदेव शर्मा(सम्पादक), पृष्ठम् ४६५

## राजनैतिकदृष्ट्या

राज्यस्तरे तथा केन्द्रस्तरे सर्वकारीय-कार्यालयेषु अपि च वित्तकोषमूलकक्षेत्रे अनुवादकस्य विशिष्टं स्थानं वर्तते। भारतसर्वकारस्य राजभाषानीतेः अन्तर्गताः बहवः युवकाः अद्यत्वे हिन्दी-अनुवादकरूपेण हिन्दी-अधिकारिरूपेण वा जीविकानिर्वाहं कुर्वन्ति। अतः एवं वक्तुं शक्यते यत्- भारतसदृशे बहुभाषिदेशे तथा आधुनिकयुगस्य विस्तृते सति प्रोद्योगिकदिशा अनुवादः सर्वदैव केन्द्रस्थितः तिष्ठतीति।[९] अनुवादमाध्यमेन अन्तर्राष्ट्रिय-सांस्कृतिकसम्बन्धाः तथा राजनैतिक-विधानानि बुद्ध्यन्ते। राष्ट्राध्यक्षेण यद् उच्यते लिख्यते वा तत् सर्वम् अनुवादेनैव अवगम्यते।

तत्र उल्लेखनीयं यत् अस्मद्देशे विदेशेऽपि बहुभिः भारतीयैः विविधमन्त्रित्वपदे नियोगात् प्राक् संस्कृतेनैव शपथग्रहणं कृतमिति दृश्यते। अनेनापि संस्कृतानुवादकार्यस्य प्रचारः प्रसारः सूच्यते।

## सूचनासम्प्रेषणगतदृष्ट्या

अद्यत्वे प्रौद्योगिकयुगेऽस्मिन् अनुवादप्रक्रिया तु वैज्ञानिकप्रक्रिया-स्वरूपा। अतः अनुवादः विज्ञानस्य कश्चित् प्रकारः।[१०] सूचनाप्रौद्योगिक्याः विकाशात् पूर्ववर्तिषु केषुचित् वर्षेषु सञ्चारव्यवस्थायाः विशेषोपादानानाम् असामान्या प्रगतिर्जाता। यथा- आकाशवाणी- दूरदर्शन-समाचारपत्रपत्रिका-आन्तर्जाल-इत्यादिभिः उपादानैः सूचनानां प्रभावशालि-सम्प्रेषणम् आरब्धम्, यत् केभ्यश्चित् वर्षेभ्यः पूर्वमसम्भवमिति सर्वैः चिन्त्यते स्म। तादृशं महत् कार्यं सम्पादयितुम् अनुवादस्य तथा अनुवादकानां भूमिका भूयसी प्रशंसनीया। संस्कृतभाषाप्रचारे विशेषां रुचिं वहन्त्या के. वरलक्ष्मीवर्या सङ्गणके संस्कृतस्य प्रयोगविषये प्रवर्तमानायां परियोजनायां संयोजिकारूपेणापि कार्यं कृतमस्ति।

अद्यत्वे जगतः कस्मिंश्चिदपि कोणे घट्यमानघटनानां सूचनाः

---

९ अनुवाद व्यवसाय : दिशाएँ और सम्भावनाएँ, प्रो.दिलीप सिंह, प्रो.ऋषभदेव शर्मा, अनुवाद का सामयिक परिप्रेक्ष्य, प्रो.दिलीप सिंह, प्रो.ऋषभदेव शर्मा(सम्पादक्), पृष्ठम् ४९९

१० अपनी बात, अनुवाद का सामाजिक परिप्रेक्ष्य, प्रो. दिलीप सिंह, प्रो. ऋषभदेव शर्मा(सम्पादक),पृष्ठम् ८

अनुक्षणं स्वभाषया अस्माकं गोचरीभूताः भवन्ति। इत्थं सूचनानां सम्प्रेषणप्रक्रियायाः मूलं तु कलास्वरूपः अनुवाद एव।[११]

सञ्चारमूलककार्यं पत्रकारितायाः उपरि न्यस्तम् अपरतः पत्रकारिता जन्मतः एव अनुवादेन सह सम्बन्धिता। पत्रकारितायाः विशेषोपादानस्वरूपोऽस्ति अनुवादः। सूचनाः समाचाराश्च विविधवैदेशिक-संस्थाभ्यः संगृह्य अपेक्षितभाषासु अनुद्य ताः प्रकाश्यन्ते प्रसार्यन्ते च।

अस्मिन् प्रोद्योगिकीयुगे सम्प्रेषणव्यवस्थायां संस्कृतानुवादस्य माहात्म्यं बर्धमानमस्ति। अतः संस्कृतेऽनुवादस्य बहुमुख्युपादेयता वर्तते।[१२]

## राष्ट्रियैक्य-वैश्वीकरणदृष्ट्या

न केवलं स्वदेशीय-वैदेशिकसाहित्यसंस्कृतिज्ञान-विज्ञानैः अस्माकं समृद्धकरणे, अपि तु जातीय(राष्ट्रिय)-संहतिसाधने अनुवादस्य महती भूमिका विद्यते। केनापि ग्रन्थकर्त्रा विरचितस्य कृतिविशेषस्य कवेः काव्यस्याकलनं ते एव कर्तुं शक्नुवन्ति, येषां तन्मूलभाषाज्ञानं स्यात्। यदि तेषां कृतिविशेषाणां भाषानुवादः क्रियते, तर्हि मूलभाषामजानन्तः अपि रसिकाः तदीयभावनामाधुर्यं विचारगाम्भीर्यं वा प्राप्तुं प्रभवन्ति। इत्थं संस्कृतेरपि पारस्परिकादानप्रदानं भवति। अनया रीत्या अनूदितसाहित्यं समग्रविश्वं सहजेनैव एकनीडं करोति, इत्यत्र नास्ति संशयलेशः।

वैश्वीकरणप्रसङ्गे वक्तुं शक्यते अनुवादः आधुनिकीकरण-पश्चिमीकरण- औद्योगिकीकरण-जातीयविविधतेत्यादीनां पाठनिर्मातृरूपः मुख्यघटकः अस्ति, यतः अन्तर्राष्ट्रियसञ्चारे तस्य महती भूमिका वर्तते।[१३] उपर्युक्तालोचनातः निष्कर्षत्वेन वक्तुं शक्यते 'वसुधैव कुटुम्बकम्' इति भारतीयं चिन्तनं मूर्तमानं जायते।

असूलालसञ्चेतीवर्यः २००१ तमे वर्षे 'टामस-ग्रे-विरचित-

---

[११] हिन्दी पत्रकारिता और अनुवाद, बीना श्रीवास्तव, अनुवादका सामयिक-परिप्रेक्ष्य,प्रो. दिलीपसिंह, प्रो. ऋषभदेव शर्मा (सम्पादक), पृष्ठम् ४५७

[१२] तत्रैव, पृष्ठम् ४६०

[१३] विश्वसाहित्य एवं अनुवादः हिन्दी का सन्दर्भ, डाँ ऋषभदेव शर्मा, हिन्दी-भारतसमूह, इंटरनेट से उद्धृत पृ-२

शोकगीतम्' इति शीर्षककृतेः संस्कृत-हिन्दी-उर्दू-राजस्थानी-भाषासु अनुवादकार्येण सह तस्य प्रकाशनेन विशेषप्रसिद्धिम् अर्जितवान्। पृथिव्यां तादृशं कार्यं कुर्वाणाः केचन सन्ति येन देश-जाति-वर्ण-धर्म-निर्विशेषेण जातीयसंहतिः स्तापिता स्यात्।

वस्तुतः हर्षदेववर्यस्य हायकू सीजो, भाति ते भारतम्, प्रतिकाव्ये राजेन्द्रमिश्रवर्यस्य गजलेषु, बनमालि-विश्वालवर्यस्य दारुब्रह्म, जगन्नाथ-चरितम्, वेलेण्टइन-डे-सन्देशः वेत्यादिषु नारायणदाशवर्यस्य स्पशकथासु उत त्रासदीकथासु तेषां पुरातनभावानामपि आवर्तनं जायते।

वैदेशिकभाषाभ्यः संस्कृतानुवादकार्यं तु प्रायः पारसिकैरेव प्रारब्धः। पारसीकानां मातृभाषा आसीत् पह्लवीभाषा। भारतीयविद्वांसः संस्कृतमाध्यमेन तेषां धर्मं साहित्यं च जानीयुरित्यभिलाषेण पारसीकपण्डितैः संस्कृतमधीत्य अवेस्ताशास्त्रभागाः अपि च अपरापरपह्लवीग्रन्थाश्च संस्कृते अनूदिताः। अनुवादकेषु मोबेद्-नेरयोसंगधवलः विशेषतया स्मरणीयः।

पारसीकपण्डितैः संस्कृते अनूदितग्रन्थानां संग्रहः 'भरूचा'-इत्युपनामविशिष्टेन एर्वद-इति धर्मपदप्राप्त-दादाभाईसुतेन शहिरि-आरजिना प्रकटितः। संग्रहोऽयम् 'Collectcd Sanskrit writings of the parsees' इत्यभिधानेन सप्तभिर्भागैः विभक्तः मुम्बापुरीस्थ-पार्शीपञ्चायत-समित्या प्रकाशितः।

अत्र प्रकाशितेषु ग्रन्थेषु मर्दान्फारुखकृतः 'शिकन्द्-गुमनीक्-विजार्'–इति स्वपक्षमण्डनपरपक्षखण्डनात्मकः दर्शनविचारग्रन्थः सुप्रसिद्धः। ग्रन्थोऽयं नेरयोसंगधवलेन 'स्कन्द-गुमानी-गुजर' इत्याख्यया अनूदितः। अनूदितग्रन्थेषु द्वितीयस्तावत् शास्त्रीयः खुर्दा-अवेस्ताग्रन्थः अनेनैव धवलवर्येणैव अनूदितः।

आधुनिककालारम्भे वैदेशिकभाषाभ्यः संस्कृतेऽनुवादन्तु क्रैस्तवधर्मप्रचारका एव कृतवन्तः। बङ्गेषु श्रीरामपुरे तिष्ठन् वैप्टिस्ट-सम्प्रदायानुयायिना अनेकभाषाविदा विलियमकेरीमहाभागेन नूतन-पुरातननियमेतिभागद्वयात्मकं 'बाईवेल' इति याहूदीक्रैस्तवधर्मशास्त्रं यथाक्रमं हिब्रूयवनभाषाद्वयादेव संस्कृते अनूदितं तथा च ऊनविंशशताब्द्याः प्रथमदशकमध्ये एव प्रकाशितम्।

## उपसंहृतिः

आधुनिककाले अनुवादस्य या गतिः सा अभूतपूर्वा इति वाक्यं तु निःसंशयं सत्यमेव। परन्तु एतदपि सत्यं यत् अनुवादकार्यस्य आवश्यकता प्रत्येकस्मिन् युगे, प्रत्येकस्मिन् काले तथा प्रत्येकस्मिन् स्थाने एव अनुभूता। शोधकार्येऽस्मिन् उपक्रमणिकायामेव मया अतिसंक्षेपेण संस्कृतानूदितसाहित्यस्य परम्परेतिहासयोरुल्लेखः कृतः यस्मादिदं प्रतिपाद्यते यत्, समग्रे विश्वे विज्ञानं प्रयुक्तिः धर्मः दर्शनं साहित्यमित्यादीनां शास्त्राणां तथा ज्ञानविज्ञानादिशास्त्राणां द्रुतं सम्पन्नविकाशेन अनुवादस्यावश्यकता दिनं दिनं क्रमवर्धमानाऽस्ति। यद्यपि आधुनिकाः संस्कृतसाहित्यिकाः प्राचीनपरम्परां संस्कृतिञ्च संरक्ष्य तथा अनुसृत्य एव अग्रगामिणः भवन्ति। प्राचीनाधुनिकयोः मध्यवर्तिसेतुस्वरूपो भवति संस्कृतानुसर्जकः।

वर्तमानपरिस्थितौ देशवासिषु पारस्परिकसमञ्जसता-सद्भावयोः भावनानां विकाशस्यावश्यकता इतोऽपि वर्धिता येन प्रत्यक्षविविधतायामपि अस्माभिः स्वसंस्कृतिं समानतां सौहार्द्यभावं च दृष्ट्वा अनेकतायामपि एकतायाः संकल्पनायाः मूर्तरूपं प्रदातुं शक्यते। अनया दृष्ट्या भाषागतसद्भावनायाः महती भूमिका वर्तते। सर्वासु भारतीयभाषासु सद्भावनायाः परिवेशः निर्मीयेत, इमाः भाषाः परस्परं भावनात्मकस्तरे सम्मिलिताः भवेयुः अपि च तासु पारस्परिकादानप्रदानस्य संकल्पः द्रढीभवेत् इत्येव भारतस्य भाषागतसद्भावनायाः मूलमन्त्रः। ईदृशं पवित्रं तथा महत् कार्यं सम्पादयितुं सम्पर्कभाषात्वेन संस्कृतस्य विशेषं योगदानम् न तु अस्वीकरणीयम्। इयमेव अद्वितीया भाषा या सम्पूर्णं देशम् एकसूत्रस्थं कृत्वा राष्ट्रिय-एकतारूपिपवित्रलक्ष्यपूरणे सफला भवेदिति प्राचीनकालादेव विद्वद्वरेण्यैः तथा च आधुनिकजनैः अपि अङ्गीक्रियते।

भाषागतसद्भावनायाः आलोचनकाले अनुवादप्रसङ्गः अनिवार्यतया आगच्छति। अपि च भारतीयसाहित्यास्मिताभ्यां गतिप्रदानकारी कश्चित् सशक्तः आधारभूतश्च माध्यमस्वरूपः।

अनुवादविज्ञानिना डॉ जी. गोपीनाथनमहाशयेन लिखितं यत् बहुभाषाभाषिदेशे अस्मिन् भारतवर्षे अनुवादस्य उपादेयता तु स्वयंसिद्धा। भारतस्य विभिन्नप्रदेशानाम् साहित्येषु निहितमूलभूत-एकतायाः स्वरूपदर्शनाय अनुवाद एव एकमात्रं साधनम्। इत्थं

मानवानाम् एकतायां वाधकस्वरूपं भौगोलिकं भाषागतं च प्राचीरम् विनश्य विश्वमैत्रीभावनाम् इतोऽपि सुदृढां करोति अनुवादकार्यमिदम्।

अस्तु तावत् संस्कृतेतरभाषातः साम्प्रतिकसंस्कृतानूदित-साहित्यानाम् आलोचनावसरेऽस्मिन् SWOT (Strengths, Weaknesses, Opportunities, Threats) Assessment– इत्यनया प्रक्रियया संस्कृतानूदित-साहित्यानां शक्ति-दौर्वल्य-अवसर-भयानि इत्येतेषां विश्लेषणं मूल्यायनं वा क्रियते।

## संस्कृतानूदितसाहित्यानां शक्तिः (Strengths)

१. इयमेव अद्वितीया भाषा या सम्पूर्णं देशम् एकसूत्रस्थं कृत्वा राष्ट्रिय-एकतारूपिपवित्रलक्ष्यपूरणे सफला भवेदिति प्राचीनकालादेव विद्वद्वरेण्यैः तथा च आधुनिकजनैः अपि अङ्गीक्रियते।

२. संस्कृतानूदितसाहित्यानां सर्वाधिकवृहच्छक्तिः अस्ति तस्य प्राचीनपरम्परालब्धज्ञानम्। विचारयामः चेत् पश्यामः सम्भावनायाः नैकानि द्वाराणि तन्माध्यमेनैव उद्घाटितानि भवितुमर्हन्ति।

३. अद्यतनीययुवसंस्कृतानुवादकानां संख्या अपि तत्र सकारात्मकशक्तिरूपेण विवेच्या।

४. सामाजिकानां संस्कृताय दायवद्धता अपि लाभाय भवेत् संस्कृतानूदितसाहित्यानां प्रकाशने।

५. संस्कृतानूदितसाहित्यानां पुनर्मुद्रणं मुद्रणावृत्तिं च दृष्ट्वा ज्ञायते यत् संस्कृतेऽनूदित-ग्रन्थानां विक्रययोग्यता अस्त्येव।

६. नवनवीनसंस्कृतानूदितसाहित्यानाम् आविर्भावेण पाठकरूचेः परिपोषणं भवति, साहित्यभाण्डारः अपि विवर्धते एव।

७. अनुवादः आधुनिकीकरण-पश्चिमीकरण-औद्योगिकीकरण-जातीयविविधता-इत्यादीनां पाठनिर्मातृरूपः मुख्यघटकः अस्ति, यतः अन्तर्राष्ट्रियसञ्चारे तस्य महती भूमिका वर्तते।

८. भारतसदृशे बहुभाषिदेशे तथा आधुनिकयुगस्य विस्तृते सति औद्योगिक-तकनीकीदिक्षु अनुवादः सर्वदैवकेन्द्रस्थितः स्थास्यति।

## संस्कृतानूदितसाहित्यानां दौर्वल्यम् (Weaknesses)

अत्र कानिचन दौर्वल्यान्यपि दृष्यन्ते –

१. प्रकाशकानाम् अभावः।
२. पाठकानां संख्या क्रमवर्धमाना अस्ति चेदपि तेषां संख्या इतरभाषासाहित्यानामपेक्षया न्युनैव।
३. अन्यत्र पारस्परिकसहयोगितायाः मानसिकतायाः अभावः, इतरप्रान्तीय-वर्ण-धर्मान् प्रति असहनशीलता अपि महती दुर्वलता।
४. संस्कृतसेवयैव संस्कृतिसेवा, तयैव च राष्ट्रसेवा इति वोधस्य अभावः विद्यते जनमनसि।
५. संगणकीयज्ञानेन सह संस्कृतज्ञानस्य समन्वयसाधनरूपकार्यम् अद्यापि असम्पूर्णम् एव वर्तते।

## संस्कृतानूदितसाहित्यानां अवसरः (Opportunities)

१. संस्कृतानूदितसाहित्यानां पाठकाः न हि समग्रे भारते विद्यमानाः सन्ति, अपि तु समग्रे विश्वे ते व्याप्याः। अतः अनुवादसाहित्यस्य आविश्वविपण्यां संस्कृतानूदितसाहित्यस्य अपि वृहत् स्थानं विद्यते एव। नवीनाः पाठकाः समग्रविश्वस्य साहित्यरसमास्वादयितुमिच्छन्ति, यत्तु केवलमनुवादेनैव सम्भवति। अतः संस्कृतानूदितसाहित्यस्य प्रचुरतया सम्भावनामयावसराः सन्ति एव।
२. मानवानाम् एकतायां वाधकस्वरूपं भौगोलिकं भाषागतं च भित्तिं विनश्य विश्वमैत्रीभावनाम् इतोऽपि सुदृढां करोति अनुवादकार्यमिदम्। अनुवादेनैव 'वसुधैव कुटुम्बकम्' इति उपनिषदीयविचारः मूर्ततां प्राप्नुयात्।
३. संगणकेन यान्त्रिकानुवादकार्ये माध्यमभाषारूपेण संस्कृतस्य प्रभूतसम्भावना वर्तते।

## संस्कृतानूदितसाहित्यानां भयानि (Threats)

१. अद्यापि संस्कृतानूदितग्रन्थानां क्रेतुः संख्या अपर्याप्ता एव।
२. नवागतानुवादकानां भाषायां व्याकरणगतविच्युतितः रक्षणीयम् आत्मानम्।
३. सरलसंस्कृतस्य व्यवहाराय ताडणा भवेत्, किन्तु सा ताडणा सरलीकरणमार्गं प्रति न नयेत्। अनुवादकार्ये भाषायाः सरलीकरणमार्गः परित्यक्तव्यः। अनुवादकानां सरलीकरणमार्गस्य स्पृहा भयावहा।
४. भाषाशुद्धता यथा रक्षणीया तथैव विषयगतस्पष्टतापि रक्षितव्या। अनुवादकाले अनुवादकाः तत्तद्विषयेषु विशेषेण ज्ञानिनः भवेयुः।

अथ संस्कृतानूदितसाहित्यानां शक्ति-दौर्वल्य-अवसर-भयानि विश्लिष्य विचार्य च वक्तव्यमिदं निःसंशयं वक्तुं पार्यते यत् अनुवादकैः भूयांसः अनुवादाः सर्जनीयाः। यतः अनुवादकार्येण परोक्षतया राष्ट्रसेवा एव क्रियते। एकेन अनुवादकेन एकतः संस्कृतिद्वयस्य राज्यद्वयस्य देशद्वयस्य विचारधाराद्वयस्य वा परस्परयोः अन्तः सेतुत्वेन कार्यं क्रियते। अपरतः तेनैव भौगलिकसीमाः उल्लङ्घ्य भाषासु पारस्परिकं सौहार्द्र-सौमनस्य-सद्भावादिकं संस्थापयति। अनेनैव एकात्मता-वैश्विकरणयोः भावनया सम्बन्धयुक्ताः भवामो वयम्। अनया दृष्ट्या अनुवादकस्तु कश्चित् समन्वयकः मध्यस्थकारी संवाहकः भाषीयदूतः इत्यादिभिः आख्याभिः सम्मानार्हः।

कस्यापि वाङ्मयस्य विशेषतः भारतीयवाङ्मयस्य संस्कृतानुवादेनैव कवेर्विचारधारायाः ऐक्यात् रूपकल्पनसादृश्याच्च तस्य वाङ्मयस्य भावसम्पदः सुरक्षिताः भवेयुरिति मद्विश्वासः। विविधप्रकारकसाहित्यस्य संस्कृतानुवादेन निखिलभारते सर्वेषां जनानामैक्यसंविधानं भावगतसंहति-साधनरूपं सुमहत् प्रयोजनं वा सिद्ध्यति, यतो हि संस्कृतभाषायामेवास्ति सर्वभारतीयमावेदनम्, अखण्डभारतीयसंस्कृतेर्बीजञ्च। आगामियुगम् आन्ताराष्ट्रियसंस्कृतेः युगं भवेत् तथा च सम्प्रेषणस्य नूतनमाध्यमानाम् आविष्करेण वैश्वीकरणस्य नित्यनूतनक्षितिजा उद्भाविता भविष्यन्ति। अस्यां पूर्णप्रक्रियायाम् अनुवादस्य महद् गुरुत्वं वर्तते। अनुवादेनैव 'वसुधैव कुटुम्बकम्' इति औपनिषदीयविचारः मूर्ततां प्राप्नुयात्। अनया दृष्ट्या सम्प्रेषणव्यापारस्य उन्नायकरूपेण अनुवादकस्य तथा अनुवादकार्यस्य भूमिका निःसंशयम् अपरिहार्या।

अथर्ववेदः अपि सामान्यप्रवाहतः उपरि उत्थाय महल्लक्ष्यं साधयितुं प्रेरयति – 'उत्कुलम् उद्वह'[१४] इति। तथैव समग्रविश्वतः नवीनशाश्वतचिन्तनानि अस्मज्जीवनधारां समागच्छन्तु इत्येवं प्रेरयति ऋग्वेदस्य 'आनोभद्राः क्रतवो यन्तु विश्वतः'[१५] इति वचनम्। इत्थम् उत्कृष्ट-संस्कृत-चिन्तनविनिमयेन समग्रविश्वम् एकनीडं कर्तुम् अनुवादस्य विशेषतः संस्कृततः संस्कृते वानूदितसाहित्यस्य महद्योगदानं वर्तते, कदाचिदपरिहार्यमेव। अतः उपसंहारत्वेन

[१४] अथर्ववेदः ४.१२.६

[१५] ऋग्वेदः १.८९.१

कविवरवच्चनजी[१६] इति कुशलानुवादकस्याभिमतम् अनुसृत्य वक्तुं शक्यते यत्, एकस्याः भाषायाः द्वितीयभाषां प्रति मित्रतायै प्रसारितः हस्तस्वरूपः अस्ति अनुवादः। सः हस्तः यावद्द्वारं यावदधिकं च दिक्षु प्रसारयितुं शक्यते, तावत् प्रसारणीयः।

## परिशीलितग्रन्थसूची


1. *Sixty Years of Sanskrit Studies* (Vol. 1 & 2); Radhavallabh Tripathi (Ed.); New Delhi- Rashtriya Sanskrit Sansthan; 2012.

२. *संस्कृतसाहित्य परिशीलन*; कृष्ण लाल, उर्वी; दिल्ली- जे.पी.पब्लिशिंग हाउस्; २००५।

३. *संस्कृत साहित्येर इतिहासवृत्त*; गोपेन्दु मुखोपाध्याय; कोलकाता- इउनाइटेड बुक एजेन्सि; २०१२।

४. *अर्वाचीन संस्कृत साहित्य दशा एवं दिशा*; मञ्जुलता शर्मा (सम्पादिका); प्रमोद भारतीयः(सहसम्पादकः) ; दिल्ली- परिमल-पब्लिकेशन्स; २००४।

५. *संस्कृत साहित्य : बीसवीं शताब्दी*; राधावल्लभ त्रिपाठी; नवदेहली- राष्ट्रिय-संस्कृत-संस्थानम्; १९९९।

६. *आधुनिक-संस्कृतसाहित्य-सन्दर्भसूची*; राधाबल्लभत्रिपाठी; नवदेहली- राष्ट्रियसंस्कृत-संस्थानम्; २०१२।

७. *अनूदित-साहित्ये आचार्य-सीतानाथशास्त्रिणो योगदानम्*; नारायणदाशः; प्रज्ञा; घाटाल- घाटाल रवीन्द्रशतवार्षिकी महाविद्यालय-पत्रिका।

८. *संस्कृतभाषायाम् अनूदित-वङ्गीय-काव्यानि*; नारायणदाशः; अभीः; नरेन्द्रपुरम्(कोलकाता)- रामकृष्णमिशन-आवासीय-महाविद्यालयः; २००८।

९. *संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्*; बनमालिबिश्वाल; नरेन्द्रपुरम् (कोलकाता)- संस्कृतविभागः, रामकृष्णमिशन-आवासीय-महाविद्यालयः; २०१२।

१०. *संस्कृतेऽनूदितं साहित्यम्(भारतीयभाषाभ्यः वैदेशिकभाषाभ्यश्च)*; सातकडिमुखोपाध्यायः; सागरिकापत्रिका (कथाविशेषाङ्कः); सागरम्- हरिसिंहगौडविश्वविद्यालयः; २०१३।

११. *संस्कृतसाहित्य-समीक्षा-विहङ्गमदृष्ट्या*; सीतानाथः आचार्यः; Contribution of Bengal in some fields of Sanskrit studies; Belur- Ramkrishna Mission Vidyamandir.

१२. *समकालिक अनूदितसंस्कृत-साहित्य*; नारायणदाशः; दृक्-७, दृग्-भारती,पू.सं-५४-६०, जनवरी-जून २००२।

१३. *अनुवाद : भारत और यूरोप कि दृष्टि मे*; शिवकुमार मिश्रः; दृक्-२१, दृग्-भारती, पू.सं-१९-३०, जनवरी-जून २००९।


✶ ✶ ✶

---

[१६] साहित्यानुवाद : संवाद और संवेदना, डॉ. आरसू, पृ. ८५

# In Search of *Bhūmā*

Banani Barman* I

## Regarding *āśrama dharma*

The ancient thinkers enumerated four stages of life known as *āśrama*. The scheme of the four-fold *āśramas* or stages of life is a unique contribution of India to the thought of the ancient world. The four *āśramas* are- *bramacarya*, *gārhastya*, *vānaprastha* and *sannyāsa*. It is integrated with the concept of *puruṣārtha* or four proper aims of life in hindu philosophy namely *dharma*, *artha*, *kāma* and *mokṣa*. Each stage has an ethical guideline for the individual and for the society. However, proper observance of *āśrama dharma* helps one to overcome all sorts of calamities and difficulties and to attain *mokṣa*. Moreover, it is well-known that Hinduism divides society into four classes and specific duties to each class and stage of life has been prescribed. Prof. S. K. Maitra nicely defined- "...the duties of *varṇa* and *āśrama* together constitute the code of relative duties, the duties of station in life, the duties obligatory on the individual in consequence of social status, temperament, specific powers and capacities."[i]

According to various *śāstric* literature of the Indian tradition the following are the duties associated with each *āśramas*. *Brahmacarya* is

---

* Assistant Professor, Dept. of Philosophy, P. R. Thakur Govt. College, Thakurnagar, Gaighata, 24Pgs(N), West Bengal.

i Maitra Susil Kumar, 2013, The Ethics of the Hindus, Kolkata: University of Calcutta, p-1

the stage of a student or the period of study and self-discipline. By all means he should respect his *guru*, observe purity and avoid amusements etc. *Gārhastyāśrama* is the most vital stage in life as it offers the largest scope for service and sacrifice. It is in this period that one could pay the debts that one owes to gods, gurus, dependants and ancestors by performing sacrifice. It is the foundation of other *āśramas*. *Manusamḥitā* establishes that men in all the three states are sustained by householders only, with knowledge and food, therefore this stage is considered as the highest state.[ii] In *vānaprasthāśrama*, one has to lead the life of a forest dweller. It is the life of contemplation and of gradual withdrawal from worldly ties. After passing through the *bramacarya* and *gṛhastha dharma* one should leave for the forest with or without his wife. After the *vānaprastha* one should enter the *sannyāsāśrama*. In this stage he leads a life of complete renunciation.

## II

## Cases where *āśrama dharma* was not followed

The system of *āśrama* is not mere theory, the duties mentioned for the four orders help man's journey towards perfection. Here I would like to cite few cases where this chain of *āśrama* system was ignored. The lives of Gautam Buddha, Sri *Caitanyadeva* and *Ācārya*

ii *yasmāt trayopyāśramiṇo jnānenānnena cānvaham. gṛhasthenaiva dhāryante tasmāj jyeṣṭhāŚramo gṛhī//Manusamḥitā*-3.78

*Śaṅkara* are selected for this discussion. All of them broke the continuity of *āśrama* system. *Siddhārtha*, the son of king *Śuddhodana* of *Śākya* clan had decided to leave his royal responsibility, his loyal wife and newly born son in order to realize enlightenment. He left the palace secretly at deep night without taking permission of his wife. Prof. Rājendraprasād in his article "On Historiography of Classical Indian Ethics" deals with a poetry written by Maithili Sharan Gupt[iii]. The poet raised an alternative voice of *Yaśodharā*.

*Siddhi hetu swāmī gaye,*
*yaha gaurava ki bāta,*
*Para corī corī gaye,*
*yahī baḍā vyāghāta.*

[*Yashodhara*, section-5]

It means- *Yaśodharā* stated that it is a matter of great honour that her husband has gone away in order to attain salvation. However, he went away like a thief which makes her mournful. Through the voice of *Yaśodharā*, Prof. Rājendraprasād argued that "if liberation is such a great thing, why does he not have the courage to wake them up and tell them of his plan to go away before departing?"[iv] Bāni Basu the famous writer of Bengali literature in her *Maitreya Jātak* raised same kind of alternative

iii Padma Bhushan Sri Maithili Sharan Gupt (1886-1964) is recognised as one of the most important modern Indian poets.

iv A Historical-Developmental Study of Classical Indian Philosophy of Morals, p.1

voice of *Yaśodharā*.[v]

Similar incident occurred in the case of *Viṣṇupriyādevī*. Pandit *Viśwambhara* or *Nimāi Panḍit* (nick name of Sri Caitanyadev) wanted to abandon hearth and home, mother and wife, friends and devotees, to become a *sannyāsin* as his brother *Viśvarūp* had done. The greatest hurdle on the way were his mother *Śacīdevī* and his wife *Viṣṇupriyā*. After much persuasion and subtle appeals, he got their extremely unwilling consent. There exists another rumour regarding this issue. When he took a resolution of accepting a monastic vow, he wished to inform the news only five and they were- *Śacīdevī*, *Gadādhara*, *Brahmānanda*, *Srī Candraśekhara*, *Mukunda*. However, *Viṣṇupriyādevī* was not among the five. As described in *Caitanya Bhāgavata*-

*Āmār Jananī gadādhara, brahmānanda/*
*Srīcandraśekharācārya, apar mukunda//*

[*Caitanya Bhāgavata* 2.26.60]

However, one night in January 1510, without the knowledge of any one, when the whole of *Navadvīpa* (hometown of Sri *Caitanya* situated at Nadia district of West Bengal) was asleep he went away from home. Sri *Caitanya* left his house at deep night without the permission of his loyal wife.

*Śaṅkara's* case was different. *Śaṅkara* was an Indian philosopher and theologian who expounded the doctrine of *Advaita Vedānta*. According to one tradition *Śaṅkara* was born into a pious nambudiri *Brāhmin* family in a

---

v Maitreya Jatak, pp. 355-356

quiet village called *Kālāḍī* on the bank of periyar river, Kerala Southern India. It is said that he had lost his father, *Śivaguru* early in his life and he was raised under the loving care of his mother. Right from his childhood he was keen on becoming a monk which was against his mother's will. *Śaṅkara* knew exactly what he had to do. Once *Śaṅkara* was taking birth in the *pūrṇā* river suddenly a crocodile caught hold of his leg and started to drag him. Since every hindu is supposed to enter the phase of *sannyāsa* before death he urged her mother to allow him to die as a monk. Having no choice, she gave her permission. As soon as she gave her consent the crocodile let go his leg immediately. *Śaṅkara* was miraculously unharmed and went on to become a monk as his mother had already given him the permission to do so (famous hearsay about *Śaṅkara's* life). In the case of *Śaṅkara* we find that he made a trick to get a permission from his mother. It is one kind of *vipralipsā* which creates moral vice. He overturned the basic discipline (speaking truth) of a brahmacarī as he was on this stage. Moreover, he was the only child of his parents and it was perhaps his utmost duty to take care of his old mother.

## III

### Dilemma: *āśrama* specific duties vs spiritual crisis

Our classical Indian thinkers do not make even a mild objection against *Gautama's* or Sri *Caitanyadeva's* activity even critics never

accuse *Śaṅkara* for using a trick to secure mother's permission for *sannyāsa*. According to the history of Indian axiology Siddhārtas's '*mahāviniṣkramaṇa*' is considered as highly commendable. Any *Vaiṣṇava* never accuse *Śrī Caitanyadeva* for his *gṛhatyāga* rather our tradition glorifies such incidents. However, to take care of one's wife and child to trust one's wife to respect the individuality, dignity, independent opinion of her as a human being are the moral duties of a husband. Primarily, we should keep in mind that both *Gautama* and Sri *Caitanya* were belonging to *gārhastya āśrama*. Therefore, to take care is of one's wife were their utmost duties of this specific stage of life. They both disobeyed the minimum promise of conjugal life. They ignored moral obligations. The duties of the married life are obligatory on whoever has married and has a family. According to *Manusamḥitā* the duty of all husband to take care their wives. Considering that the highest duty of all castes, even weak husbands strive to guard their wives.[vi]

Now the question is: are their actions should be morally justified. This question will be entertained in the very next section.

## Bibliography:

1. *Caitanya Prasanga*; Jagadish Bhattacharya; Kolkata-Bangīya Sāhitya Pariṣad; 1421(Bangābda).

---

[vi] *Imamḥi sarvavarṇānāmḥpaśyanto dharmamuttamam. Yatante rakṣitumḥ bhāryāmḥ bhartāro durbalā api*[*Manusamḥitā* 9.6]

2. *The Ethics of the Hindus*; Susil Kumar Maitra; Kolkata- University of Calcutta; 2013.
3. *Upanisat-Samgraha*; J.L. Shastri (Editor); New Delhi- Motilal Banarsidass Publisher; 2011.
4. *Swami Vivekananda on Universal Ethics and Moral Conduct* Swamī Ranganāthānanda, Bombay- Bharatiya Vidya Bhavan; 1995.
5. *Bhakti school of Vedānta*; Swamī Tapasyānanda; Mylapore- Sri Ramakrishna Math; 2003.
6. *Classical Indian Ethical Thought*; Kedar Nath Tiwari; New Delhi- Motilal Banarsidass Publisher; 2007.
7. *What The Buddha Taught*; Walpola Sri Rahula; London- Oneworld Publication; 2019.
8. *A Historical-Developmental Study of Classical Indian Philosophy of Morals*; Rajendraprasad (Editor); New Delhi- PHISPC (Centre for Studies in Civilization); 2009.
9. *Maitreya Jatak*; Bani Basu; Kolkata- Ananda publishers; 2002.

**E-sources:**

1. <https://www.wisdomlib.org>
2. <https://www.hindi-kavita.com>

✶ ✶ ✶

# The status of *Kinnaras* in Ancient India and Modern India and also mostly based on Sanskrit Literature

Nilachal Mishra*

## Introduction

Sanskrit Literature is very vast and divided into two parts like Classical Literature and Vedic Literature. There is a beautiful description of the *puruṣārtha catuṣthayas*, and which main intention is meant for the development of human beings.

At first, the *Brāhmaṇa* text like *Śathapatha Brāhmaṇa* describes of the *Kinnaras* who are the men of sheep faced (*Aśvamukhī*). In the Classical Sanskrit Literature like the *Mahābhārata* and the *Rāmāyaṇa* described the subjects of *Kinnaras* vividly. In *Vālmīki Rāmāyaṇa*, *Ayodhyā kāṇḍa*, when Lord *Śrīrāma* accepts the order to stay fourteen years in the forest with his younger brothers *Lakṣmaṇa* and *Janakanandīni Sītā*, at that time every people of *Ayodhyā* with many ladies, gents, and *Kinnaras* went out of the city, *Ayodhyā* for leaving their dearest Lord *Śrīrāma*. All the people were returned to their homes but except the *Kinnaras*, and they are waited at that place till returning of their Lord, *Śrīrāma* to the kingdom, *Ayodhyā*.

Hindu Mythology describes the *Kinaras*

* Lecturer in Sanskrit, K.C.P.A.N Jr. College, Bankoi, Khurda, Odisha, India

who are paradigmatic lovers, and a celestial musician, part human, part horse, and also a part bird, Buddhist mythology describes the characters of the two beloved mythological characters, and they are the benevolent half-human, half-bird, and they are known as the *kinnaras* and *Kinnarīs*. It is believed they have come from the Hindu the *Himālayas*, and it is often seen, they are the wellbeing of human society at the time of danger or any trouble.

*Kimpuruṣas* are described as lion-headed beings *Kim* ( Is it? ) + *Puruṣa* (man), which is the splitting of the word like *Kimpuruṣa*, and literally translated as 'Is it human?'. *Kinnaras* and *kimpuruṣas* are related most likely the same tribe. Some *purāṇas* mention the kinnaras as horse-headed.

*Purāṇas* mentions the devil with horse-headed, and he is known as *Hayagriva*, who is also horse headed in Sanskrit. That *Asura* was killed by Lord *Viṣṇu* who incarnated as a similar form of a horse-headed human figure. The great epic the *Rāmāyaṇa* and the *Mahābhārata*, and the *Purāṇas* describe *Himālayas* as the living place of *Kinnaras*.

There are a description of two actors in the *Mahābhārata* who are the *Kinnaras* and they worked the developmental works for developing of the *Paṇḍavas*, their first name is *Śikhaṇḍī* and second is the son of Arjuna, *Irāvān*. *Śikhaṇḍī* fulfilled his vow after the death of the grandfather, *Bhīṣma*. And *Irāvān* helped his grandfather, *Arjuna* in the battle

of *Kurukṣhetra* by showing his heroic deeds to all. (*Mahābhārata, Sabhāparva, Vanaparva, Bhīṣmaparva*, Chapter-83, 90, 91 ).

As per the view of his grandfather *Bhīṣma* of the *Mahābhārata*, the *Kinnaras* become very obedient and they can be engaged as the servant in the inner house of the kings. The city named *Kārtikeya Nagara* was always filled with the singing of the *Kinnaras*. (*Mahābhārata, Śāntiparva*).

There is a description of visiting of the *Arjuna* towards the cities of *Kinnaras*. The hero *Arjuna* went to the *kimpuruṣaas* by crossing the *Dhavalagiri* which was saved by *Drumaputra*. (*Mahābhārata, Sabhāparva*).

The definition of *Kinnaras* is given in the *Amarakoṣa* like this. '*Syātkinnaraḥ kiṁ puruṣasturangavadano mayuḥ*' means the *Kinnaras* and the *kimpuruṣas* are the same and such word used for the *kinnaras* in the Sanskrit literature. The beautiful description of *Kinnaras* is seen in the *Mahākāvya, Kumārasambhavam* by *Kālidāsa* like this.

*Udvejayatyadagaliparṣiṇabhāgān mārgeśailībhūtahimepi yatra.*

*Na durvahaśroṣipayodharārtā bhidati mandāṁgatimaśvamukhyaḥ..*

*Yatrāmśukākṣepavilajjitānāṁ yadṛcchayākimpuruṣānganānāṁ.*

*Darīgṛhadvāravilambibimvāśastiraskariṇyo jaladā bhavanti..*

(*Kumārasambhavam*, Canto 1, Sloka 14).

Further, In another place of *Kumārsambhavam* of *Kālidāsa*, *Kinnara* girls have participated in a singing program and they have got accompany with *Pārvatī*, the daughter of the mountain, *Himālaya*. The description of *Kumārsambhavam* is seen as follows:

*Upāttavarṇe carite Pinākinaḥ*
*savāṣpakaṇthaskhalitaiḥ padairiyam.*
*Anekaśaḥ kinnararājakanyakā*
*Vanāntasangītasakhīrarodayat..*

(*Kumārasambhavam*, Canto V, Sloka 56).

When *Pārvati* sings the songs of the Lord *Śiva*, at that time, the daughter of *Kinnara* Kings gave the accompany with her in the dancing programs in the forest, and the *Kinnara* girls are naturally competent in the works of music, which is described by the poet, *Kālidāsa* in *Raghuvamśam* like this.

*Vṛttam˙ Rāmasya Vālmīkeḥ kṛtistvau kimṅarasvanau.*
*Kim˙ tadyena mano hartumalam˙ syātām˙ na śṛṇvatām..*

(*Raghuvamśam* 15.64)

*Viṣṇudharmotora Purāṇa* describes the Kinnaras like this.

*Kinnarākhyā kimpuruṣāḥ nāgāḥ kadrusutā matāḥ.*
*Sidhā vidyādharāḥ proktā devarātmāstathāpsarā..*

(*Viṣṇudharmottara Purāṇa*, *Śāstriya* chapter, page 21)

This is the story of the *Kinnaras* that, they are the son of the *Gandharvas*, *Nāgas*, and *kadrus*, and they are competent in many *vidyās.* So they are the soul of the gods and like the *apsarās. Kālidāsa*, the great poet of Sanskrit says:

*Yaḥ pūrayan kīcakarandhrabhagān darīmukhothena samīraṇena.*

*Udgāsyatāmicchati kinnarāṇām̐ tānpradāyitvāmivopagantum.*

(*Kumārsambhavam*, Canto I, Sloka 8)

*Kālidāsa* says in *Meghadūtam* that, the bamboos make a sound which is very melodious and the *kinnara* girls were singing the songs of the Lord *Mahādeva's tripurāsura* winning story. If your sound makes the sound of *mṛdanga*, then the singing of *Mahādeva's* song fulfills all the things. The description of *Kālidāsa's* voice is like this.

*Śavdāyante madhurmanilaiḥ kīcakaḥ pūryamāṇāḥ*

*Sam̐sthābhistripuravijayo gīyate kinnarībhiḥ.*

*Nihārdaste muraja eva cetkanderṣu dhvaniḥ svyāt*

*Sanghātārtho nanu paśupatstatrā bhāvī samagraḥ..*

(*Pūrvamegha*).

*Purāṇas* describe the *Kinnaras,* and the system of callings of the *Kinnaras* are described in *Viṣṇudharmottara Purāṇa* very beautifully, and the *Kinnaras* come by the calling. *Purāṇa*

says:

*Āvahayiṣyāmi tathā kinnarāḥ devagayanān.*

*Āyantu kinnarāḥ survey susvarāstu sulacana..*

## Today's Indian law about the *Kinnaras*

'Recognition of transgenders as the third gender is not a social or medical issue but a human rights issue' It is said by Hon'ble Justice K.S Radhakrishnan of Supreme Court of India, who headed the two-judge Supreme Court Bench. The Court says:

'Transgenders are also citizens of India, and they must be provided equal opportunity to grow.'

The court order provides the legal sanctity to the third gender Laxmi Narayan Tripathi who was the petitioner of the case welcomed such type of judgment and telling that the community had suffered from a long time in the field of discrimination and ignorance. In the year 2009, the Election Commission of India took a good step by giving permission to choose their gender as 'other' on ballot forms (bbc.com).

*Kinnaras* are called the third gender in our society and it is known that their sexual organs are not fully developed. As per a calculation of 2011 of India, there are 4.9 lakhs kinnaras are lived in the whole of India, and among them, 37 thousand kinnaras are also lived in the state like Uttar Pradesh.

Under the chairmanship of our Hon'ble

Prime Minister Sri Narendra Modiji has passed a personal bill in the assembly of the betterment of *kinnaras*, and they have accepted the third gender as per the judgment of the Supreme Court of India. And by which order, *Kinnaras* are able to gain all the facilities about social life, education, and also in the field of economical benefits.[i]

## Conclusion

From the above discussions, it is concluded that the *kinnaras* are not the same as the common people, they possess some extra-ordinary qualities and some divine qualities but the society looks them as not the same people as us. Nowadays their social status increases and they are now eligible to get the same rights as the livings of common people because they have lives and they are also human beings and not different from others.

## Bibliography


1. *Bohal Sodh Manusha*; Dr. Naresh Sihag; Haryana-Gugan Ram Educational & Social Welfare Society; May, 2019.
2. *Sahitya Ke Pariprekshya Me Kinnara Vimarsh*; Dr. Saniya Gupta; Haryana- Gina Prakashan.
3. *Kumarasambhavam Mahakavyam*; Jagdishlal Shastri; Delhi- Motilal Banarasidass.
4. *The Meghaduta of Kalidasa*; M.R. Kale; Delhi- Motilal Banarsidass Publishers Pvt.Ltd.
5. *Raghuvamsam*; M.R. Kale; New Delhi- Motilal Banarsidass Publishers Pvt.Ltd.


---

i *Sahitya ke pariprekshya me kinnar vimarsha*, Page 29

✶ ✶ ✶